HALAYUDHA'S

ABHIDHANA RATNAMALA

A SANSKRIT VOCABULARY

TH. AUFRECHT

HALAYUDHA'S

ABHIDHANARATNAMALA.

A

SANSKRIT VOCABULARY,

EDITED WITH A

SANSKRIT-ENGLISH GLOSSARY

BY

TH. AUFRECHT.

Published by

INDIAN INDIA

Booksellers & Publishers
7, Malka Ganj, Delhi 110007.

First Indian Reprint 1975

Printed at :—Hindustan offset Press.
Daya Basty old Rohtak Road Delhi-35

PREFACE.

The present edition of Halâyudha's vocabulary of synonyms is based on a collation of the following manuscripts.

A. E. I. H. 1361, copied about 1780.

B. Wilson 415, an incorrect transcript of A.

C. E. I. H. 588.

D. E. I. H. 1576. These two manuscripts, copied about 1806 from the same original, are almost useless for any critical purpose.

E. A fragment preserved in the Berlin Library (Chambers 758. Weber's Catalogue Nr. 805), containing distichs 18 — 367 of book II. I am indebted for a transcript of it to Dr. Hase of Coburg.

F. An old fragment in the Ratcliffe Library, Oxford, containing the second book, as far as çloka 230.

R. A manuscript in the same library, copied in the year 1363 of our era.

Notwithstanding all these materials, the editor has found it not always possible to constitute a text free from faults; far less to give a correct and uniform orthography. In many cases he has been obliged to have recourse to the Koshas of Amara and Hemacandra and their commentaries, in order to remove palpable blunders. The notes, and to some extent the glossary, point out all the passages in which a further collation of new Mss. is desirable. He has much felt, throughout, the want of a commentary; but though at least one is cited in the marginal notes to the Oxford Ms. of the commentary on the Abhidânacintâmani, yet none appears to be in existence.

The precise age of Halâyudha cannot now be determined with any degree of certainty. The name itself is by no means uncommon in the literary history of India. We have, firstly, Halâyudha, the author of the Kavirahasya, who has been assigned by Westergaard (Radices p. VII) to the sixteenth century. Another Halâyudha, the son of Purushottama, compiled the Puranasarvasva in 1474 (Oxford Catalogue p. 84). Halâyudha the lawyer is frequently cited by Vâcaspatimiçra (in the Cintâmaṇi and Dvaitanirnaya), and, still earlier, by Viçveçvara, the author of the Madanapârijâta and other works. A fourth Halâyudha, who shares with our author the epithet of Bhatta, composed a commentary on the Pingala-

chandas. He may, perhaps, be identified with the writer of the Kosha; chiefly on account of the many artificial metres which he uses, and which no other lexicographer has taken the liberty of employing for such a dry subject as a string of synonyms. The editor has, however, discovered no allusion to the Kosha in the only copy of the Mṛitasamjivini at his command. Nor do the four names of Amaradatta, Vararuci, Bhâguri, and Vopâlita, to whose works the author acknowledges himself indebted in the introductory verses to the Kosha, afford any clue to his own age. In the absence of direct evidence, we are, therefore, compelled to be contented with the secondary testimony of other writers. The mention of Halâyudha by Ujjvaladatta, Mallinâtha, and the Medinîkara, is sufficient proof that he lived before the thirteenth century. Mallinâtha in his various commentaries cites Halâyudha far more frequently than the Abhidhânacintâmani; but from this fact no inference can be drawn as to the greater antiquity of Halâyudha, for the orthodox scholiast might have preferred a coreligionist to a Jain infidel. Halâyudha is quoted besides, by Kâtavema on the Çâkuntala, Jayamangala on the Bhaṭṭikâvya, Narahari in his Cûḍâmani, Nârâyana on the Uttararâmacarita, Padmanâbhadatta on the Bhuvaneçvarîstotra, Bharatasena on the Bhattikâvya, Bhânujîdîkshita on Amara, Ranganâtha on the Vikramorvaçî, Râyamukuta in his commentary on the Amarakosha, Çivadatta in the Çivakosha, and a number of other scholiasts.

There is, however, an intimate connexion between the Abhidhânaratnamâlâ and the Abhidhânacintâmani, beyond the mere name. Not only do whole distichs and verses agree with one another, and differ from Amara, but there is also in both an identity of tetrastichs, and this to an extent which cannot be explained by the supposition that both have borrowed from the same source. Again, we find that both attribute to many words the same gender in opposition to the Amarakosha. But if we are called on to determine the relative priority of Halâyudha and Hemacandra, we must be guided in our decision by the following circumstances. Halâyudha's vocabulary is not only less copious, but his style is much more simple, and his explanations enter more into detail. To use whole distichs and verses in order to define a single word, is quite unusual with Hemacandra, who, on the contrary, endeavours to cram into one verse as many synonyms as possible. Farther, we find that in technical divisions Hemacandra is acquainted with more developed, and therefore later, systems. For example, the different kinds of feminine actions produced by the sentiment of love, technically called hâva, are limited by Amara to six, and by Halâyudha to nine, while Hemacandra knows ten. In the physiological distinction of elephants, Halâyudha does not exceed the number of three, whilst Hemacandra adds a fourth. The Ratnamâlâ is divided into five, the Cintâmaṇi into six chapters. Homonyms are treated by Halâyudha very briefly, whereas the Nânârtha of

Hemacandra surpasses in bulk the Ekârtha. All these facts lead to the conclusion that Halâyudha preceded Hemacandra, and we shall hardly go too for back if we place him at the end of the eleventh century.

In Mallinâthas commentary on the Mâghakâvya (Calc. ed.) two passages (I, 19. XVI, 18) are cited from an Abhidhânaratnamâlâ which seems to have been different from that of Halâyudha.

In compiling the glossary, the editor has constantly consulted the commentaries of Kshîrasvâmin and Râyamukuṭa on Amara, which form the only valuable basis of all later scholiasts. Of modern writers, he feels himself under great obligation to Colebrooke's edition of the Amarakosha, and to Molesworth's Mahrati and English Dictionary.

In conclusion he would express his thanks to the publishers for having most obligingly undertaken to bring out a work which, from its nature, can be of interest only to a limited number of Sanskrit scholars.

The abbreviations employed in the glossary are:

Ait. Br. - Aitareyabrâhmaṇa.
Anandal. - Ânandalaharî.
Av. - Atharvaveda.
Bhk. - Bhaṭṭikâvya.
Bhv. - Bhâminîvilâsa.
Brahmap. - Brahmapurâṇa.
Brahmav. - Brahmavaivartapurâṇa.
Bṛihadâr. - Bṛihadâraṇyakopanishad.
Çat. Br. - Çatapathabrâhmaṇa.
Chând. U. - Chândogyopanishad.
Çiçup. - Mâgha's Çiçupâla.
Çivap. - Çivapurâṇa.
Daṇḍin - Daṇḍin's Kâvyâdarça.
Devîbhâg. - Devîbhâgavatapurâṇa.
Dhânv.Nigh.-Dhânvantaranighaṇṭu.
Gg. - Gîtagovinda ed. Lassen.
HC. - Hemacandra, and the commentary ascribed to him.
Kâçîkh. - Kâçîkhaṇḍa.
Kir. - Kirâtârjunîya.
Ks. or Kum. - Kumârasambhava.
Ksh. - Kshîrasvâmin on Amara.
Mâgha - Mâgha's Çiçupâla.
Mahi. - Mahimnaḥ stava.
Manu - Mânavadharmaçâstra.
Mârk. - Mârkaṇḍeyapurâṇa.
Matsyap. - Matsyapurâṇa.
Mhbh. - Mahâbhârata.
Mit. - Mitâksharâ.
P. - Pâṇini.
Phetk. - Phetkâriṇîtantra.
Pk. - Pârçvanâthakâvya by Padmasundara.
Râyam or Rk. - Râyamukuta on Amara.
Rasamanj. - Bhânudatta's Rasamanjarî.
Rasatar. - Rasataranginî.
Rgh. - Raghuvança.
Rigvidh. - Ṛigvidhâna.
Rv. - Ṛigveda.
Sâhityad. - Sâhityadarpana.
Sarasvatîk. - Sarasvatîkanthâbharana.
Taitt. Br. - Taittirîyabrâhmaṇa.
U. or Urv. - Urvaçî ed. Bollensen.
Ujj. - Ujjvaladatta.
Vâgbh. Al. - Vâgbhatta Alankâra.
Vâmanap. - Vâmanapurâna.
Vârâhap. - Vârâhapurâna.
Vṛihann. - Vrihannâradîyapurâna.
Vs. - Vâjasaneyisamhitâ.
Yv. or Yâjn. - Yâjnavalkya ed. Stenzler.

॥ श्रीगणेशाय नमः ॥

शब्दब्रह्म यदेकं यच्चैतन्यं च सर्वभूतानां।
यत्परिणामस्त्रिभुवनमखिलमिदं जयति सा वाणी ॥१॥
इयममरदत्तवररुचिभागुरिवोपालिता दिशास्त्रेभ्यः।
अभिधानरत्नमाला कविकंठविभूषणार्थमुद्ध्रियते ॥२॥
स्वः स्वर्गः सुरसद्म त्रिदशावासस्त्रिविष्टपं त्रिदिवं
द्यौर्गौरमर्त्यभुवनं नाकः स्यादूर्ध्वलोकश्च ॥३॥
आदित्यास्त्रिदशाः सुराः सुमनसः स्वर्गौकसो देवता
गीर्वाणा ऋभवो ऽमराश्च मरुतो वृंदारका निर्जराः।
अस्वप्ना विबुधास्त्रिविष्टपसदो लेखाः सुपर्वाण इत्याख्याता
अमृताशना अनिमिषा देवास्तथा दैवतं ॥४॥
असुरा दानवा दैत्या दैतेयाः सुरशत्रवः।
पूर्वदेवाः शुक्रशिष्याः पातालनिलयाः स्मृताः ॥५॥
ब्रह्मा स्रष्टा धाता परमेष्ठी पद्मभूः सुरज्येष्ठः।
वेधा विधिर्विरिंचो हिरण्यगर्भः शतानंदः ॥६॥

शंभुः स्वयंभूर्द्रुहिणश्चतुर्वक्त्रः प्रजापतिः।
पितामहो जगत्कर्ता विरंचिः कमलासनः॥७॥
वाग्वाणी भारती भाषा गौर्गीर्ब्राह्मी सरस्वती।
ओंकारः प्रणवः प्रोक्तस्त्रयो वेदास्त्रयी स्मृता॥८॥
वेदः श्रुतिस्तथाम्नायः स्वाध्यायश्छंद आगमः।
वेदांतश्च रहस्यं च बुधैरुपनिषन्मता॥९॥
ऊहस्तर्को ऽनुमानोक्तिर्मीमांसा स्याद्विचारणा।
स्मृताः कृतांतराद्धांतसिद्धांतसमयाः समाः॥१०॥
ईशानः शशिशेखरः पशुपतिः शूली शिवः शंकरः
शर्वः शंभुरुमापतिश्च गिरिशः श्रीकंठ उग्रो हरः।
सर्वज्ञस्त्रिपुरांतकस्त्रिनयनो कपर्दी भवो भूतेशः
परमेश्वरो ऽंधकरिपुर्दक्षाध्वरध्वंसकृत्॥११॥
स्थाणुः स्रष्टा धूर्जटिर्वामदेवः कामध्वंसी व्योमकेशः कपाली।
नीलग्रीवोवह्निरेताः पिनाकी भीमोभर्गः कृत्तिवासावृषांकः
॥१२॥
अहिर्बुध्नो विरूपाक्षः शिपिविष्टो गणाधिपः।
गंगाधरो महादेवो मृडः स्यान्नीललोहितः॥१३।
पिनाकं स्यादजगवं प्रमथास्तु गणाः स्मृताः।
कपर्दो ऽस्य जटाबंधस्तंडुः स्यान्नंदिकेश्वरः॥१४॥
रुद्राणी शर्वाणी काली कात्यायनी भवानी च

आर्याम्बिका मृडानी हैमवती पार्वती गौरी ॥१५॥
उमा भगवती दुर्गा चंडी दाक्षायणी शिवा।
अपर्णा स्यान्महादेवी गिरिजा मेनकात्मजा ॥१६॥
ब्रह्माण्याद्याः स्मृताः सप्त देवता मातरो बुधैः।
चामुंडा कर्णमोटी च चर्चा स्याद्भैरवी तथा ॥१७॥
हेरंबो लंबोदर आखुरथो गणपतिश्च गजवदनः।
परशुधर एकदंतो विनायको विघ्नराजश्च ॥१८॥
गौरीपुत्रः षण्मुखः शक्तिपाणिः
क्रौंचारातिः कार्त्तिकेयो विशाखः।
स्कंदः स्वामी तारकारिः कुमारः
सेनानीः स्यादग्निभूर्बाहुलेयः ॥१९॥
गांगेयो ब्रह्मचारी च गुहो बर्हिणवाहनः।
महासेनो महातेजाः शरजन्मा च कथ्यते ॥२०॥
विष्णुः कृष्णः केशवो मंजुकेशी
श्रीवत्सांकः श्रीपतिः पीतवासाः।
विष्वक्सेनो विश्वरूपो मुरारिः
शौरिः शार्ङ्गी पद्मनाभो मुकुंदः ॥२१॥
गोविंदो धरणीधरः सुपर्णकेतुर्वैकुंठो जलशयनश्चतुर्भुजश्च।
दैत्यारिर्मधुमथनो रथांगपाणिर्दाशार्हः क्रतुपुरुषो वृषाकपिः
स्यात् ॥२२॥

जनार्दनाधोक्षजवासुदेवं दामोदरं श्रीधरमच्युतं च।
उपेंद्रमिंद्रावरजं च बभ्रुं हरिं हृषीकेशमुदाहरंति ॥२३॥
आत्मभूः पुंडरीकाक्षः श्रीवत्सो विष्टरश्रवाः।
नारायणो जगन्नाथो वनमाली गदाधरः ॥२४॥
सनातनो जिनः शंभुर्विधिर्वेधा गदाग्रजः।
कैटभारिरजो जिष्णुः कंसजित्पुरुषोत्तमः ॥२५॥
चक्रं सुदर्शनं चापं शार्ङ्गं कौमोदकी गदा।
खड्गो ऽस्य नंदकः शंखः पांचजन्यः प्रकीर्तितः ॥२६॥
कौस्तुभो वक्षसि मणिः श्रीवत्सो ऽस्य च लाञ्छनं।
वसुदेवस्तु कथितो बुधैरानकदुंदुभिः ॥२७॥
बलदेवो बलभद्रो मुशली नीलांबरः प्रलंबघ्नः।
सीरी च सात्वतः स्यात्तालध्वज एककुंडलो ऽनंतः ॥२८॥
संकर्षणो रौहिणेयः कालिंदीकर्षणो बलः।
रेवतीरमणो रामः कामपालो हलायुधः ॥२९॥
विहंगराजो गरुडो गरुत्मान् तार्क्ष्यः सुपर्णीतनयः सुपर्णः।
स्याद्वैनतेयः पवनाशनाशः सुरेंद्रजित्कश्यपनंदनश्च ॥३०॥
लक्ष्मीः श्रीः कमला पद्मा पद्मवासा हरिप्रिया।
क्षीरोदतनया मा च शब्दज्ञैरिंदिरा स्मृता ॥३१॥
प्रद्युम्नो मकरध्वजो मनसिजः संकल्पजन्मांगजः
पंचेषुः कुसुमायुधश्च मदनो मारः स्मरो मन्मथः।

कंदर्पो झषकेतनो रतिपतिः श्रीनंदनो हृच्छयः
कामः शंबरसूदनो मधुसखः शृंगारयोनिः स्मृतः ॥३२॥
दर्पकः शूर्पकारातिरनंगो विषमायुधः।
आत्मभूर्मनसिशयः पुष्पधन्वा मनोभवः ॥३३॥
मापत्यमिरजश्चैव कामपत्नी रतिः स्मृता।
अनिरुद्धश्च तत्सूनुरुषारमण इष्यते ॥३४॥
आदित्यः सविता सहस्रकिरणः प्रद्योतनो भास्कर-
स्तिग्मांशुस्तरणिस्तथा दिनमणिर्भास्वान्विवस्वान्हरिः
मार्तंडस्तपनो विकर्तन इनः पूषा पतंगो भगः
सूर्यो गोपतिरर्यमा दिनकरः सूरो ऽंशुमाली रविः ॥३५॥
मिहिरो विरोचनो ऽर्कस्तिमिररिपुर्द्युमणिरंशुमानंशुः।
हरिदश्वः सप्ताश्वः प्रभाकरो भानुमान्भानुः ॥३६॥
ब्रध्नो हंसः खगो मित्रश्चित्रभानुरहर्पतिः।
कर्मसाक्षी जगच्चक्षुर्द्वादशात्मा त्रयीतनुः ॥३७॥
रोचिः शोचिरभीशुः प्रद्योतगभस्तिरश्मिघृणिकिरणाः।
रुचिरुग्दीधितिदीप्तिद्युतिप्रभाभाविभाभासः ॥३८॥
उस्रधामवसुकेतुमरीचिप्रग्रहोपधृतिवृष्णिमयूखाः।
अंशुभानुकरपादविरोका गाव इत्यभिहितास्तु समानाः ॥३९॥
तिग्मं तीक्ष्णं खरं तीव्रं चंडमुष्णं पटु स्मृतं।
आतपः कथ्यते रौद्रं निदाघो घर्म उच्यते ॥४०॥

परिधिः परिवेषः स्यान्मंडलं चोपसूर्यकं ।
उच्यते राहुसंस्पर्श उपराग उपप्लवः ॥४१॥
इंदुश्चंद्रश्चंद्रमा ओषधीशः सोमो राजा रोहिणीवल्लभोऽब्जः ॥
नक्षत्रेशः स्यादत्रिनेत्रप्रसूतः प्रालेयांशुः श्वेतरोचिः शशांकः ॥४२॥
द्विजराजो रजनिकरः पीयूषरुचिर्निशीथिनीनाथः ।
जैवातृको मृगांको विधुश्च दाक्षायणीरमणः ॥४३॥
चंद्रिका कौमुदी ज्योत्स्ना तथा चंद्रातपः स्मृतः ।
मंडलं विंबमाख्यातं हृदये लांछनं मृगः ॥४४॥
अंकश्चिह्नमभिज्ञानं लांछनं लक्ष्म लक्षणं ।
कलंकश्चेति विज्ञेया नातिनानार्थवाचकाः ॥४५॥
वक्रमंगारकं भौमं लोहितांगं धरात्मजं ।
रौहिणेयं बुधं सौम्यमाहुश्चांद्रमसायनं ॥४६॥
वाचस्पतिरांगिरसो बृहस्पतिः कथ्यते गुरुर्जीवः ।
धिषणास्त्रिदशाचार्यश्चित्रशिखंडिप्रसूतश्च ॥४७॥
उशना शुक्रः काव्यो दैत्यगुरुर्भार्गवः कविर्धिष्ण्यः ।
असितः क्रोडः पंगुश्छायातनयः शनैश्चरः शौरिः ॥४८॥
स्वर्भानुः सैंहिकेयश्च तमो राहुर्विधुंतुदः ।
केतवः शिखिनः प्रोक्ता आर्द्रालुब्धक उच्यते ॥४९॥
सप्तर्षयस्तु विद्वद्भिः स्मृताश्चित्रशिखंडिनः ।
कृत्तिका बहुला प्रोक्ताः पक्षस्तु बहुलोऽसितः ॥५०॥

भं नक्षत्रं तारकं तारका च ज्योतिस्तारा धिष्ण्यमृक्षं तथोडु ।
पुष्यस्तिष्यः स्याद्धनिष्ठाश्रविष्ठा दाक्षायण्यः कीर्तिताश्चंद्रदाराः ॥५१॥

इंद्रो दुश्च्यवनो हरिः सुरपतिः संक्रंदनो वासवो
वृत्रारिर्बलसूदनः शतमखो वृद्धश्रवाः कौशिकः ।
जिष्णुर्वज्रधरः सहस्रनयनो वास्तोष्पतिर्गोपतिः
पर्जन्यो मघवा वृषा हरिहयः प्राचीनबर्हिः स्मृतः ॥५२॥
पुरुहूतः पृतनाषाट् पुरंदरः पूर्वदिक्पतिः स्वाराट् ।
आखंडलस्तुराषाट् सुत्रामा गोत्रभित्सुनासीरः ॥५३॥
शक्रः स्यादुग्रधन्वा च हरिवान्पाकशासनः ।
दिवस्पतिर्विडौजाश्च मरुत्वान्मेघवाहनः ॥५४॥
इंद्राणी पौलोमी शची जयंतश्च तत्सुतो ज्ञेयः ।
अमरावती च नगरी नंदनमुद्यानमिंद्रस्य ॥५५॥
पविरशनिः शतधारं वज्रं कुलिशं च भवति दंभोलिः ।
गौर्भिदुरं व्याधामः स्वरुरिंद्रप्रहरणं तथा शंबः ॥५६॥
स्फूर्जथुर्वज्रनिर्घोषो वज्रज्वालातिभीः स्मृता ।
ऋजु रोहितमिच्छंति बुधाः शक्रशरासनं ॥५७॥
अभ्रमब्दो घनो मेघः स्तनयित्नुः पयोधरः ।
धाराधरो धूमयोनिर्जीमूतश्च बलाहकः ॥५८॥
धारासंपात आसारो वातास्तं वारि सीकरः ।

दुर्दिनं मेघतिमिरं करकः स्याद्घनोपलः।
चलन्नवाभ्रमाला च बुधैः कादम्बिनी स्मृता ॥ ५९॥
शंपा चपला क्षणिका शतह्रदा ह्लादिनी तडिद्विद्युत्।
सौदामिन्यचिरांशुः प्राज्ञैरैरावती च विज्ञेया ॥६०॥
ऐरावतो ऽभ्रमातंगः स चैरावण उच्यते।
उच्चैःश्रवास्तु देवाश्वो मातलिः शक्रसारथिः ॥६१॥
सप्तार्चिर्बर्हिः कृतवह्नो वैश्वानरो ऽग्निर्वसु-
र्वह्निर्वायुसखः सितेतरगतिः स्वाहाप्रियः पावकः।
अर्चिष्मान् ज्वलनः कृशानुरनलो धूमध्वजो हव्यवाट्
बर्हिर्ज्योतिरुषर्बुधश्च दहनः स्याच्चित्रभानुः शुचिः ॥६२॥
कृपीटयोनिर्दमुनाः कृष्णवर्त्माशुशुक्षणिः।
विभावसुरपां पित्तं जातवेदास्तनूनपात् ॥६३॥
वीतिहोत्रो वृहद्भानुराश्रयाशो धनंजयः।
हिरण्यरेतास्तमोघ्नो रोहिताश्वो हुताशनः ॥६४॥
अर्चिः कीला ज्वाला वर्चस्तेजस्त्विषस्तथा ज्योतिः।
हेतिर्द्युतिर्दीप्तिरुचः शिखाप्रभारश्मयः समानार्थाः ॥६५॥
स्मृतः प्रकाश आलोक उद्द्योतश्च समास्त्रयः।
अग्नायी कथ्यते स्वाहा धूम्या स्याद्धूमसंहतिः ॥६६॥
ऊष्मा वाष्पः स्फुलिंगश्च कणा जिह्वास्तथार्चिषः।
अलातमुल्मुकं ज्ञेयमुल्का ज्वालास्य निर्गता ॥६७॥

भवति हिरण्या कनका रक्ता कृष्णा सुप्रभा चान्या।
अतिरक्ता बहुरूपेति सप्त सप्तार्चिषो जिह्वाः ॥६८॥
एधस्तर्पणमिंधनमेधः समिदिध्म इत्यभिन्नार्थाः।
भूतिर्भसितं भस्म क्षारं रक्षा च निर्दिष्टा ॥६९॥
वनवह्निर्दवो दावो मेघवह्निरिरंमदः।
और्वः समुद्रवह्निः स्याद्वाडवो वडवामुखः ॥७०॥
शमनः समवर्ती च प्रेतपतिः पितृपतिश्च कीनाशः।
वैवस्वतः कृतांतः कालिंदीसोदरः कालः ॥७१॥
अंतको धर्मराजश्च यमो दंडधरो हरिः।
दक्षिणाशापतिः सद्भिः श्राद्धदेवश्च कथ्यते ॥७२॥
यातूनि यातुधानाः क्रव्यादा राक्षसाश्च रक्षांसि।
नक्तंचरनैर्ऋतकौणपास्तथा नैकषेयाः स्युः ॥७३॥
वरुणं यादसां नाथं पाशपाणिं प्रचेतसं।
जलाधिदैवतं प्राहुः प्रत्यगाशापतिं बुधाः ॥७४॥
पवनः श्वसनो वायुर्मरुदनिलो मारुतो जगत्प्राणः।
पृषदश्वः पवमानः प्रभंजनः स्पर्शनो वातः ॥७५॥
नभस्वान्मातरिश्वा च समीरश्च समीरणः।
सदागतिर्गंधवहो हरिः प्रोक्तो महाबलः ॥७६॥
झंझावातः सवृष्टिः स्याद्वात्या वातस्य मंडली।
आमोदः स्यात्परिमलः सौरभ्यं च सुगंधिता ॥७७॥

ऐलविलः पौलस्त्यो वैश्रवणः किंनरेश्वरो धनदः।
श्रीदः श्रीकंठसखो मनुष्यधर्मा धनाध्यक्षः॥७८॥
उत्तराशापतिर्यक्षः कुबेरो नरवाहनः।
गुह्यको राजराजश्च धनी पुण्यजनेश्वरः॥७९॥
द्युम्नं द्रव्यं द्रविणं राः सारं स्वापतेयमर्थः स्वं।
ऋक्थं पृक्थं वित्तं धनं हिरण्यं च वसु विभवः॥८०॥
अकुप्यं रूप्यहेमाख्यं कुप्यमन्यद्धनं भवेत्।
गोमहिष्यादिकं सर्वं बुधैर्जीवधनं स्मृतं॥८१॥
निक्षेपः स्यादुपनिधिः कथ्यते शेवधिर्निधिः।
किंनरः स्यात्किंपुरुषो मयुरश्वमुखस्तथा॥८२॥
उद्यानं स्याच्चैत्ररथं विमानं चास्य पुष्पकं।
अलका नगरी ज्ञेया पुत्रस्तु नलकूवरः॥८३॥
विश्वकृद्विश्वकर्मा च त्वष्टा स्याद्देववर्धकिः।
नासत्यावश्विनौ दस्रौ प्रोक्तौ देवचिकित्सकौ॥८४॥
शौद्धोदनिर्दशबलो बुद्धः शाक्यस्तथागतः सुगतः।
मारजिदद्वयवादी समंतभद्रो जिनश्च सिद्धार्थः॥८५॥
जिनेंद्रो वीतरागोऽर्हन् केवली च त्रिकालवित्।
अलक्ष्मीर्निर्ऋतिर्ज्ञेया नियतिर्विधिरुच्यते॥८६॥
यक्षराक्षसगंधर्वसिद्धकिंनरगुह्यकाः।
विद्याधराप्सरोभूतपिशाचा देवयोनयः॥८७॥

घृताची मेनका रंभा उर्वशी च तिलोत्तमा।
सुकेशी मंजुघोषाद्याः कथ्यंते ऽप्सरसो बुधैः ॥ ८८ ॥
हेलाविलासबिब्बोकलीलाललितविभ्रमाः।
स्त्रीणां शृंगारचेष्टाः स्युर्हावपर्यायवाचकाः ॥ ८९ ॥
बाह्यार्थालंबनो यस्तु विकारो मानसो भवेत्।
स भावः कथ्यते सद्भिस्तस्योत्कर्षो रसः स्मृतः ॥ ९० ॥
रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।
जुगुप्साविस्मयशमाः स्थायिभावाः प्रकीर्तिताः ॥ ९१ ॥
शृंगारहास्यकरुणा रौद्रवीरभयानकाः।
बीभत्साद्भुतशांताश्च नव नाट्ये रसाः स्मृताः ॥ ९२ ॥
गीतं गानमिति प्रोक्तं वाद्यमातोद्यमिष्यते।
नृत्यं तु तांडवं लास्यं त्रितयं नाट्यमुच्यते ॥ ९३ ॥
तालः कालक्रियामानं लयः साम्यमुदाहृतं।
अंगहारो ऽंगविक्षेपः सूच्यो ऽर्थो ऽभिनयः स्मृतः ॥ ९४ ॥
प्रेक्षार्थं गीतवाद्यं तु संगीतमभिधीयते।
आदावेव तु यन्नाट्यं पूर्वरंगः स उच्यते ॥ ९५ ॥
प्रोक्ता घोषवती वीणा विपंची परिवादिनी।
वल्लकी चेति तद्भेदास्तंत्रीभेदसमुद्भवाः ॥ ९६ ॥
रंगः स्यान्नर्तनस्थानं मृदंगो मुरजः स्मृतः।
आनकः पटहो ज्ञेयो डिंडिमः पणवस्तथा ॥ ९७ ॥

कोणो वादनदंडः स्याद्भेरी दुंदुभिरिष्यते।
नाट्ये राज्ञी स्मृता देवी कुमारो भर्तृदारकः ॥९८॥
भाव इत्युच्यते विद्वान् भावुको भगिनीपतिः।
आवुकस्तु पिता ज्ञेय आर्यो मारिष उच्यते ॥९९॥
आशाः ककुभः काष्ठा हरितश्च दिशः समाख्याताः।
इंद्रानलयमनैर्ऋतवरुणमरुद्धनदरुद्रदिक्पालाः ॥१००॥
ऐंद्री पूर्वा प्राची याम्या दिग्दक्षिणा तथावाची।
स्याद्वारुणी प्रतीची कौवेरी चोत्तरोदीची ॥१०१॥
अंतराला दिशश्चान्या विदिशः प्रदिशः स्मृताः।
उपरिष्टादुपर्यूर्ध्वं तथाधस्तादवागधः ॥१०२॥
प्राचीनं प्राक् स्मृतं प्राज्ञैरुदीचीनमुदक् तथा।
प्रत्यक् चैव प्रतीचीनमपाचीनमपागिति ॥१०३॥
ऐरावतः पुंडरीकः कुमुदांजनवामनाः।
पुष्पदंतः सार्वभौमः सुप्रतीकश्च दिग्गजाः ॥१०४॥
दिष्टः कालस्तथानेहास्तद्भेदाः स्युः कलादयः।
अहोरात्रं च विद्वद्भिः कथ्यते षष्टिनाडिकं ॥१०५। ×
दिवसो दिवा दिनं द्युः प्रोक्तमहर्वासरस्तथा घस्रः।
प्रहरो यामः संध्ये रजनीदिनयोः प्रवेशनिष्क्रासौ ॥१०६॥
तमी तमिस्रा कथिता तमस्विनी
विभावरी नक्तमुखा च शर्वरी।

× अयं प्रमादः। अहोरात्रः पुंसि नियतः। द्वन्द्वे तु अहोरात्रे ... नपुंसकता दृष्टा।

क्षपा त्रियामा क्षणदा निशीथिनी
निशा च दोषा रजनी च यामिनी ॥१०७॥
वसतिर्वासतेयी च श्यामा रात्रिश्च कथ्यते।
गणरात्रो निशा बह्व्यश्चिररात्रस्ततः परं ॥१०८॥

> गणरात्रम् इत्येव साधु। संख्यापूर्वा रात्रिरिति लिङ्गानुशासनसूत्रेण नपुंसकत्वविधानात्।

सायं दिवावसानं स्यात्प्रदोषो रजनीमुखं।
निशीथो मध्यमा रात्रिः प्रोक्ता सा च महानिशा ॥१०९॥
अवतमसमंधतमसं संतमसं ध्वांतमंधकारं च।
तिमिरं तमस्तमिस्रां तमिस्रमिच्छंति भूछायां ॥११०॥
कल्यमुषः प्रत्यूषं प्रगे प्रभातं भवेद्विभातं च।
दिवसमुखं गोसर्गः प्रातर्व्युष्टं च निर्दिष्टं ॥१११॥
शशिनि सिनीबाली स्याद्दृष्टे नष्टे कुहूरमावास्या।
अनुमतिरूने राका संपूर्णे पूर्णमासी च ॥११२॥
त्रिंशदहोरात्रः स्यान्मासस्ताभ्यामृतुर्वसंताद्याः।
ग्रीष्मः प्रावृट् शरदा हेमंतः शिशिर इति ते षट् ॥११३॥
चैत्रादिमासा मधुमाधवौ द्वौ ततः परं शुक्रशुची क्रमेण।
नभोनभस्यौ कथिताविषोर्जौ सहः सहस्यौ च तपस्तपस्यौ॥११४॥
मासेन मनुष्याणां पित्र्यमहोरात्रमेकमिच्छंति।
अब्देन तु देवानां ब्राह्मं देवयुगसहस्राभ्यां ॥११५॥
हायनाब्दशरद्वर्षसंवत्सरसमाः समाः।
निदाघः कथ्यते ग्रीष्मो वर्षाः प्रावृट् तपात्ययः ॥११६॥

संवर्तः परिवर्तः क्षयो युगांतो जगद्विनाशश्च ।
कल्पांतः समसुप्तिः संहारः स्यान्महाप्रलयः ॥११७॥
सांदृष्टिकं फलं सद्य उदर्कं फलमुत्तरं ।
तत्कालं तु तदात्वं स्यादुत्तरः काल आयतिः ॥११८॥
दितिरदितिर्दनुकद्रूनिकषाविनताश्च मातरः प्रोक्ताः ।
दैत्यसुरदानवोरगपिशिताशनपक्षिराजानां ॥११९॥
चंद्रार्कावेकवाक्येन पुष्पदंतौ प्रकीर्तितौ ।
जायापती च विद्वद्भिर्जंपती दंपती तथा ॥१२०॥
द्यावाभूमी च रोदस्यौ रोदसी रोदसीति च ।
कशिपुर्भोजनाच्छादावौशीरं शयनासने ॥१२१॥
श्वःश्रेयसं स्यात्कल्याणं श्वोवसीयं शिवं शुभं
भविकं भावुकं श्रेयो भव्यं भद्रं च मंगलं ॥१२२॥
प्रमोदप्रमदौ हर्षः प्रीतिरुत्कर्ष उद्भवः ।
संमदो मुत्तथानंदः शर्म जोषं च शं सुखं ॥१२३॥
कैवल्यं निर्वाणं निःश्रेयसममृतमक्षरं ब्रह्म ।
अपुनर्भवो ऽपवर्गो मुक्तिर्मोक्षो महानंदः ॥१२४॥
सनातनं ध्रुवं नित्यं शाश्वतं स्यादनश्वरं ।
धर्मः पुण्यं वृषः श्रेयः सुकृतं च समं स्मृतं ॥१२५॥
इष्टानिष्टफलं प्राज्ञैः स्मृतं दैवमयानयं ।
भागधेयं तथा भाग्यं विपाको भवितव्यता ॥१२६॥

उपलिंगमरिष्टं स्यादुपसर्ग उपद्रवस्तथोत्पातः।
ईतिरजन्यं च बुधैर्डमरो डिंबश्च विप्लवः कथितः॥१२७॥
अर्चा पूजा सपर्या स्यादुपहारो बलिः स्मृतः।
प्रणिधानं समाधानं समाधिश्च समास्त्रयः॥१२८॥
वरिवस्या परिचर्या शुश्रूषोपासना परीष्टिः स्यात्।
सेवा भक्तिरुपास्तिः प्रसादनाराधनोपचारश्च ॥१२९॥
प्रतिबिंबं प्रतिरूपं प्रतिमानं प्रतिकृतिं प्रतिच्छंदं।
प्रतिकायं च प्रतिनिधिमाहुः प्रतियातनां प्रतिच्छायां ॥१३०॥
अर्चा तु प्रतिमा प्रोक्ता हरिणी स्याद्धिरण्मयी।
अन्यलोहमयी प्राज्ञैः सूर्मी स्थूणा च कथ्यते॥१३१॥
शुचिर्मेध्यं पवित्रं च पुण्यं पावनमुच्यते।
विमलं विशदं वीध्रमुज्ज्वलं स्यादनाविलं॥१३२॥
भुवनं विष्टपं लोको जगदेकार्थवाचकाः।
अमृतं त्रिदशाहारः सुधा पीयूषमुच्यते॥१३३॥
असवो जीवितं प्राणा जीवो जीवा च कथ्यते।
क्षेत्रज्ञः पुरुषो ह्यात्मा संसारी चेतनो मतः॥१३४॥
मंदारपारिजातकहरिचंदनकल्पवृक्षसंतानाः।
पंचैते सुरतरवो मेरुः सुरपर्वतो ज्ञेयः॥१३५॥
शक्रक्रीडाचलो मेरुः सुमेरुर्हेमपर्वतः।
रत्नसानुरिति ख्यातो हेमाद्रिस्त्रिदशालयः॥१३६॥

नभो मरुद्वर्त्म विबद्विहायस्तारापथः पुष्करमंतरिक्षं।
व्योमांबरं विष्णुपदं च खं द्यौर्विहायसा स्याद्गगनं
तथा द्युः ॥१३७॥

ह्रादो नादः शब्दः स्वानो ध्वानः स्वरो रवो घोषः।
अभिधानव्याहारोदीरणकथनादयस्तु तद्भेदाः ॥१३८॥

कोलाहलः कलकलस्तुमलो व्याकुलो रवः।
उच्चावचमिति प्रोक्तमनिबद्धं तु यद्वचः ॥१३९॥

उच्चैस्तरो ध्वनिस्तारो मंद्रो गंभीर उच्यते।
कलश्च मधुरोऽव्यक्तो विक्रुष्टो निष्ठुरो मतः ॥१४०॥

सांत्वं स्यान्मधुरं वाक्यं प्रियं सत्यं च सूनृतं।
व्यातं क्लिष्टमविस्पष्टमबद्धं वियुतार्थकं ॥१४१॥

तूर्णोद्धितं निरस्तं स्याद्ग्रस्तं लुप्तपदं स्मृतं।
अंभूकृतं सनिष्ठीवं ग्राम्यमश्लीलमुच्यते ॥१४२॥

भिन्नकंठो ध्वनिर्धीरैः काकुरित्यभिधीयते।
समासप्रायमाख्यातं पदजातं च तंडकं ॥१४३॥

ऋतं सत्यं समीचीनं सम्यक् तथ्यं यथातथं।
अलीकं वितथं मिथ्या मृषा स्यादनृतं तथा ॥१४४॥

अर्थवादः प्रशंसा च स्तोत्रमीडा स्तुतिर्नुतिः।
विकत्थनं स्तवः श्लाघा वर्णना च निगद्यते ॥१४५॥

चटु चाटु प्रियं वाक्यं हृद्यार्थं हृदयंगमं।
वार्त्तोदितः प्रवृत्तिश्च वृत्तांतश्च समाः स्मृताः ॥१४६॥

अनादिवार्त्ता स्त्वैतिह्यं किंवदंती जनश्रुतिः।
कौलीनं जनवादः स्याद्विगानं वचनीयता ॥१४७॥
अपवाद उपक्रोशो निर्वादावर्णवादपरिवादाः।
एकार्थाः कथ्यंते गर्हा निंदा जुगुप्सा च ॥१४८॥
शाप आक्रोश आक्षेपः क्षारणा स्याद्विडंबनं।
स्मृताः सोल्लुंठसोत्प्रासोपहासाः समास्त्रयः ॥१४९॥
अनुल्लापो मुहुर्भाषा प्रलापो ऽनर्थकं वचः।
काक्वा वर्णनमुल्लापः संलापो भाषणं मिथः ॥१५०॥
मर्मरः शुष्कपर्णानां विस्फारो धनुषां ध्वनिः।
बृंहितं वारणानां च हेषा ह्रेषा च वाजिनां ॥१५१॥
आख्या संज्ञाभिधाह्वानं नामधेयं च नाम च।
आख्यायिका कथाख्यानं प्रह्लीका प्रहेलिका ॥१५२॥
विदुराम्रेडितं प्राज्ञा द्विस्त्रिर्व्याहरणं च यत्।
कीर्तिः श्लोको यशोभिख्यासमाख्यास्तुल्यलक्षणाः ॥१५३॥
प्रश्नः स्यादनुयोगः पर्यनुयोगो भवेदुपालंभः।
आकारणमाह्वानं कथयंत्यभिमंत्रणं प्राज्ञाः ॥१५४॥
तत्रभवान् भगवानिति शब्दो वृद्धैः प्रयुज्यते पूज्ये।
पादा इति नामांते देवो भट्टारको वापि ॥१५५॥

॥ इति श्रीभट्टहलायुधकृतायामभिधानरत्नमालायां
स्वर्गकांडं प्रथमं समाप्तं ॥

भूर्भूमिर्वसुधावनिर्वसुमती धात्री धरित्री धरा
गौर्गोत्रा जगती रसा क्षितिरिला क्षोणी क्षमा क्ष्माचला।
कुः पृथ्वी पृथिवी स्थिरा च धरणी विश्वंभरा मेदिनी
ज्यानंता विपुला समुद्रवसना सर्वंसहोर्वी मही ॥१॥
काश्यपी भूतधात्री च रत्नगर्भा वसुंधरा।
धराधारा च विज्ञेया तद्विशेषान्निबोधत ॥२॥
उर्वरा सर्वसस्या भूर्भवेदिरिणमूषरं।
खिलमप्रहतं स्थानं मरुर्धन्वा स्थलं स्थली ॥३॥
मृन्मृत्तिका प्रशस्तासौ मृत्सा मृत्स्नेति कथ्यते।
शाड्वलं हरितं प्रोक्तं नड्वलं नलसंयुतं ॥४॥
कृष्णभूमः प्रदेशो ऽसौ यत्र स्यात्कृष्णमृत्तिका।
पांडुभूमस्तथा प्रोक्त उदग्भूमश्च पंडितैः ॥५॥
नद्यंबुजीवनो देशो नदीमातृक उच्यते।
वृष्टिनिष्पाद्यसस्यस्तु विज्ञेयो देवमातृकः ॥६॥
मुद्गादीनां क्षेत्रं मौद्गीनं कौद्रवीणमित्यादि।
व्रैहेयं शालेयं भवति पुनर्व्रीहिशाल्योर्यत् ॥७॥
तिल्यं तैलीनं स्यान्माष्यं माषीणमुम्यमौमीनं।
भंग्यं भांगीनं वा यव्यं षष्टिक्यमेषां च ॥८॥

शाकशाकटमाख्यातमथवा शाकशाकिनं।
शाकस्य क्षेत्रमन्येषामेवं क्षेत्रेषु संकृतिः॥९।
अचलशिलोच्चयशैलक्षितिधरगिरिगोत्रपर्वताव्हार्याः।
नगशिखरिसानुमंतो धराद्रिकुध्राश्च तुल्यार्थाः॥१०॥
नितंबः कटको ज्ञेयः सानु प्रस्थं तटं भृगुः।
शृंगं च शिखरं कूटं निर्झरः प्रस्रवो ऽंभसां॥११॥
गुहा पाषाणसंधिः स्यात्कंदरः कंदरा दरी।
निकुंजं गह्वरं प्रोक्तं पादाः प्रत्यंतपर्वताः॥१२॥
शिलोपलाश्मपाषाणग्रावाणः प्रस्तरो दृषत्।
गलिताः स्थूलपाषाणा गंडशैला इति स्मृताः॥१३॥
अयस्कांतविशेषाः स्युश्चुंबकभ्रामकादयः।
आकरः स्यात्खनिर्गंजा रुमा च लवणाकरः॥१४॥
उच्यते गैरिकं धातुस्ताम्रं शुल्वमुदुंबरं।
आरकूटः स्मृतो रीतिः कांस्यं सौराष्ट्रकं तथा॥१५।
गिरिसारमश्मसारं लोहं कालायसं तथा शस्त्रं।
तीक्ष्णमयः पारशवं कवयः कथयंत्यभिन्नार्थं॥१६॥
सीसकं सीसपत्त्रं स्याद्वंगं च मधुकं त्रपु।
रजतं कलधौतं च रूप्यं तारं च कथ्यते॥१७॥
हेम स्वर्णं जातरूपं सुवर्णं भर्म रुक्मं हाटकं शातकुंभं।
गांगेयं स्याद्गैरिकं भूरि चंद्रं राः कल्याणं निष्कमष्टापदं च।१८॥

जांबूनदं हिरण्यं कनकमहारजतकांचनानि स्युः।
कार्तस्वरचामीकरकर्बुरतपनीयनामानि ॥१९॥
अश्मगर्भं मरकतं हरिन्मणिरिति स्मृतः।
शोणाश्मा पद्मरागः स्याद्वैदूर्यं बालवायजं ॥२०॥
स्फटिकः सूर्यकांतः स्यादर्काश्मा दहनोपलः।
रत्नं वसु मणिः सर्वं सर्वं लोहं च तैजसं ॥२१॥
वृक्षो ऽङ्घ्रिपः क्षितिरुहः शिखरी च शाखी
　शालो वनस्पतिरगो विटपी कुठश्च।
अद्रिः कुजस्तरुरनोकह इत्यभिन्नाः
　शब्दा द्रुविष्टरनगद्रुमपादपाश्च ॥२२॥
अवकेशी स विज्ञेयः फलैर्बंध्यस्तु यो भवेत्।
क्षुपो ह्रस्वशिफाशाखी फलवान् फलिनः फली ॥२३॥
वानस्पत्याः स्मृता वृक्षा ये पुष्यंति फलंति च।
फलंति ये विना पुष्पं तान्वदंति वनस्पतीन् ॥२४॥
फलपाकावसानास्तु बुधैरोषधयः स्मृताः।
लता प्रतानिनी वल्ली प्रततिर्व्रततिस्तथा ॥२५॥
अवाग्भागो भवेद्बुध्नः प्राग्रं तु शिखरं शिरः।
विस्तारो विटपः प्रोक्त आरोहस्तु समुच्छ्रयः ॥२६॥
स्कंधादधः प्रकांडः स्यात् प्रघाणः स्कंध उच्यते।
स्कंधशाखा तु शाला स्यान्निष्कुहः कोटरः स्मृतः ॥२७॥

अमरस्तु स्यादावालमावालमावाप इति पठति।

त्वग्वल्कं वल्कलं प्रोक्तं मज्जा सार उदाहृतः।
काष्ठं भवेत्कंदः पादो मूलं जटा शिफा ॥२८॥
आवाल आलवालः स्यादावापः स्थानकं तथा।
लतोद्गमो ऽवरोहस्तु प्रवालः पल्लवांकुरः ॥२९॥
पल्लवः स्यात्किसलयं वल्लरी मंजरी तथा।
बर्हं पर्णं दलं पत्त्रं पलाशं छदनं छदः।
अंकूरश्चांकुरः प्रोक्तो वृंतं प्रसवबंधनं ॥३०॥
पुष्पं प्रसवः कुसुमं प्रसूनकं सुमनसः समाख्याताः।
कोरकजालककलिकाकुड्मलमुकुलानि तुल्यानि ॥३१॥ मानुजिदी मितसनवं भेदं पठ्यति।
उन्मीलितमुन्मिषितं स्मितमुन्निद्रं विजृंभितं हसितं।
उद्बुद्धं व्याकोशं पुष्पेषु विकाशवाचकाः शब्दाः ॥३२॥
पौष्पं रजः परागः स्यान्मकरंदो मधु स्मृतः।
स्तवको गुच्छको गुच्छो गुलुंछः परिकीर्तितः ॥३३॥
शलाटुः कोमलं प्रोक्तं वानं शुष्कफलं भवेत्।
बीजकोशी शमी शिंबा ग्रंथिः पर्व परुस्तथा ॥३४॥
उलपस्तंबगुल्माश्च वीरुधो विटपाः स्मृताः।
शष्पं बालतृणं प्रोक्तं सर्वं च तृणमर्जुनं ॥३५॥
घासस्तु यवसः प्रोक्तो बर्हिर्दर्भः कुथः कुशः।
उलपो बल्वजः प्रोक्त इषीका काश उच्यते।
हरिताली भवेद्दूर्वा शरो मुंज इति स्मृतः ॥३६॥

रंभा कदली मोचा तृणराजः कथ्यते तलस्तालः।
कंकेलिरशोकः स्यादाम्रश्चूतश्च सहकारः ॥३७॥
मृद्वीका गोस्तनी द्राक्षा हारहूरा च कथ्यते।
प्रियंगुः फलिनी श्यामा कुटजो गिरिमल्लिका ॥३८॥
करवीरो हयमारो मालूरः श्रीफलो भवेद्बिल्वः।
करुणो जंबीरः स्याद्बदरी कुवली च कर्कंधुः ॥३९॥
अर्जुनं ककुभं प्राकुः सालं सर्जं च सूरयः।
काबुकः पिचुलः प्रोक्त इज्जलो निचुलः स्मृतः ॥४०॥
अरिष्टः पिचुमंदः स्यात् न्यग्रोधो वट उच्यते।
श्रीवृक्षः पिप्पलोऽश्वत्थो बुधैर्बोधिश्च कथ्यते ॥४१॥
ब्रह्मवृक्षः पलाशः स्यात्किंशुकश्च त्रिपत्रकः।
महावृक्षः स्नुहिः प्रोक्तः शेलुः श्लेष्मातकः स्मृतः ॥४२॥
नक्तमालः करंजः स्याद्वृषा वासाटरूषकः।
आरग्वधः कृतमालः स्वर्णपुष्पी च कथ्यते ॥४३॥
वृक्षोत्पलः कर्णिकारः पीतसालोऽसनः स्मृतः।
दंडोत्पलः सहदेवा सल्लकी स्याद्गजप्रिया ॥४४॥
निर्गुंडी सिंदुवारः स्यान्मदारः पारिभद्रकः।
तांबूली नागवल्ली स्याद्गुवाक पूग उच्यते ॥४५॥
वानीरो वंजुलः शीतो विदुलो वेतसः स्मृतः।
गोक्षुरः स्थलशृंगाटः श्वदंष्ट्रा स्यात्त्रिकंटकः ॥४६॥

पिचव्यो बादरः प्रोक्तः कर्पासस्तूलकं पिचुः ।
कोशातकी पटोली स्याद्गिरिकर्ण्यपराजिता ॥४७॥
कथ्यते कृष्णला गुंजा तापिच्छः काकतुंडिका ।
किंपाकः स्यान्महाकाल ओष्ठी बिंबी च तुंडिका ॥४८॥
त्वचिसारश्च यो वंशो वेणुत्वक्सारमस्कराः ।
स्वनंति ये ऽनिलोद्भूता वेणवस्ते तु कीचकाः ॥४९॥
नीला झिंटी भवेद्बाणः पीता सहचरी भवेत् ।
मालती कथ्यते जातिर्मागधी यूथिका तथा ॥५०॥
हेमपुष्पमिह नागकेसरं केसरं च वकुलं प्रचक्षते ।
कोविदारमपि कांचनारकं मल्लिकां विचकिलं
विचक्षणाः ॥५१॥
वर्णपुष्पममलानकं तथा किंकिरातमुदितं कुरंटकं ।
ओड्रपुष्पमभिधीयते जपा सप्तला च नवमालिका स्मृता ॥५२॥
बंधूकं बंधुजीवं स्यात्पुन्नागः पुरपर्णिका ।
अतिमुक्तकमिच्छंति वासंती माधवी लतां ॥५३॥
एर्वारुश्चिर्भटः प्रोक्तो वालुकी कर्कटी तथा ।
कर्कारुरथ कूष्मांडस्तुंब्यलाबूश्च दुग्धिका ॥५४॥
अरण्यमटवी सत्त्वं कांतारं काननं वनं ।
विपिनं गहनं चेति नातिभिन्नार्थमिष्यते ॥५५॥
तटोपकंठे या जाता वनराजी महीभृता ।

उपत्यकां तु तामाहुरुपरिष्टादधित्यकां ॥५६॥
नगरान्नातिदूरेण यः सद्भिरुपरोपितः।
तरुषंडः स आरामस्तथोपवनमुच्यते ॥५७॥
विज्ञेयं प्रमदवनं नृपस्तु यस्मिन् शुद्धांतैः सह रमते गृहोपकंठे।
उद्यानं स्वयमपरैः समं च लोकैरन्येषां विभववतां च
पुष्पवाटी ॥५८॥
मातंगद्विरदद्विपाः करिगजस्तंबेरमानेकपाः
कुंभी कुंजरवारणेभरदिनः सामोद्भवः सिंधुरः।
तुल्यार्थाः कथिता हरिर्मृगपतिः पंचाननः केसरी
हर्यक्षो नखरायुधो मृगरिपुः सिंहश्च कंठीरवः ॥५९॥
भद्रो मंदो मृगश्चेति विज्ञेयास्त्रिविधा गजाः।
वनप्रचारसादृश्यसत्त्वभेदोपलक्षिताः ॥६०॥
मूर्धपिंडौ स्मृतौ कुंभौ कुंभयोरंतरं विदुः।
करटः स्यात्कटो गंडो वमथुः करसीकरः ॥६१॥
दानं मदो विषाणौ च दशनौ स्कंध आसनं।
अपांगदेशो निर्याणं कर्णमूलं तु चूलिका ॥६२॥
अवग्रहो ललाटं स्यादारक्षः कुंभयोरधः।
दंतयोरुभयोर्मध्यं प्रतिमानं प्रचक्ष्यते ॥६३॥
कराग्रं पुष्करं प्रोक्तमंगुलिः कर्णिका मता।
पेचकः पुच्छमूलं तु पक्षं स्याद्विंदुजालकं ॥६४॥

लग्नः प्रभिन्नो मत्तः स्यादुपात्तो मदवर्जितः।
तिर्यग्दंतप्रहारस्तु गजः परिणतो मतः॥६५॥
सज्जितः कल्पितो ज्ञेयो बहूनां घटना घटा।
चूषा कक्ष्या वरत्रा स्यादालानं स्तंभ उच्यते॥६६॥
पादकर्म यतं प्रोक्तं यातमंकुशवारणं।
उभयं वीतमाख्यातं भेदः स्थूलोच्चयो गतेः॥६७॥
करीरी दंतमूलं स्याद्वारी च गजबंधनं।
निगडः पादबंधश्च हिंजीरः शृंखलोऽंदुकः॥६८॥
कलभः करिपोतः स्यादंकुशः सृणिरुच्यते।
औपवाह्यो राजवाह्यः संनाह्यः समरोचितः॥६९॥
व्यालो दुष्टगजः प्रोक्तो हस्तिनी तु वशा स्मृता।
आधोरणा हस्तिपका हस्त्यारोहा निषादिनः।
गजाजीवास्तु शास्त्रज्ञैर्महामात्रा इति स्मृताः॥७०॥
कोलः क्रोडः शूकरः स्याद्वराहः
पोत्री दंष्ट्री घृष्टिरुक्तः किरिश्च।
व्याघ्रो द्वीपी पुंडरीकस्तरक्षुः
शार्दूलः स्याच्चित्रकायो मृगारिः॥७१॥
महिषः सैरिभ उक्तो रक्ताक्षः कासरो लुलायश्च।
वाध्रीणसश्च खड्गी गंडक इति कथ्यते सद्भिः॥७२॥
ऋक्षाच्छभल्लभाल्लूकभल्लूकाश्च समाः स्मृताः।

अरण्यश्वा बुधैर्ज्ञेयः कोक ईहामृगो वृकः ॥७३॥
गोमायुर्भूरिमायः स्याच्छृगालो जंबुकः शिवा।
फेरंडः फेरवः फेरुः क्रोष्टा च मृगधूर्तकः ॥७४॥
एणः कुरंगो हरिणो मृगः स्यात्सारंग ऋष्यः पृषती रुरुश्च।
न्यंकुस्तथा रंकुरिति प्रसिद्धा वातप्रमीशंबरकृष्णसाराः ॥७५॥
बलीमुखो मर्कटको वनौकाः प्लवंगमः स्यात् प्लवगः प्लवंगः।
हरिः कपिः कीश इमे च शब्दाः शाखामृगो वानर
इत्यभिन्नाः ॥७६॥
गोलांगूल इति प्रोक्तः कृष्णवक्त्रस्तु मर्कटः।
कपेः क्रीडादिकं किं चित्कापेयमिति कथ्यते ॥७७॥
शल्लः शल्लकः श्वावित्तत्सूची शललं शलं।
व्याघ्राद्यो वनचराः पशवः श्वापदाः स्मृताः ॥७८॥
गोधा मुशलिका प्रोक्ता गौधेरास्तत्सुता मताः।
सरटः कृकलासः स्यात्प्रतिसूर्यशयानकः ॥७९॥
आखुर्वृषो मूषकः स्यादुंदुरः खनकस्तथा।
छुच्छुंदरी च विज्ञेया विद्वाद्भिर्गंधमूषिका ॥८०॥
ओतुर्बिडालो मार्जारो वृषदंशश्च कथ्यते।
जाहको गात्रसंकोची मंडली च बुधैः स्मृतः ॥८१॥
पतन्पतंगः पतगः पतत्री पक्षी शकुंतिः शकुनिः शकुंतः।
वयो विहायो विहगो विहंगो विहंगमः पत्त्ररथो
गरुत्मान् ॥८२॥

शकुनः खगो नगौकाः पत्री विर्विष्किरस्तथा विकिरः।
अंडजनीडजवाजिद्विजाश्च कथिताः समानार्थाः॥८३॥
तनूरुहं गरुत्पत्त्रं पतत्रं छदनं छदः।
पिच्छ वाजस्तथा पक्षः पक्षमूलं तु पक्षतिः॥८४॥
पेशीकोशः स्मृतो ऽ डश्च कुलायो नीड उच्यते।
चंचुश्चंचूस्तथा त्रोटिर्डयनं गगने गतिः॥८५॥
केकी शिखी शिखंडी प्रचलाकी बर्हिणः कलापी च।
सर्पाशनो मयूरः शिखावलः श्यामकंठश्च॥८६॥
वाणी केका शिखा चूडा चंद्रको मेचकः स्मृतः।
प्रचलाकः शिखंडश्च कलापो बर्ह उच्यते॥८७॥
अन्यभृतः परपुष्टः कलकंठः कोकिलः पिकः प्रोक्तः।
कलविंकश्चटकः स्याद्गृहबलिभुक् नीलकंठश्च॥८८॥
क्रौंचः क्रुङ् स्यात् खंजनः खंजरीटः
कोकश्चक्रश्चक्रवाको रथांगः।
दार्वाघाटः सारसः पुष्कराख्यः
प्रोक्ता सद्भिः सारसी लक्ष्मणा च॥८९॥
अरिष्टः करटः काको बलिपुष्टः सकृत्प्रजः।
एकदृग्बलिभुक् ध्वांक्षश्चिरंजीवी च वायसः॥९०॥
उलूकः कौशिकः प्रोक्तो ध्वांक्षारातिर्निशाटनः।
काकोलो मौकलिर्द्रोणः कृष्णकाको वनाश्रयः॥९१॥

कृकवाकुस्ताम्रचूडः कुक्कुटश्चरणायुधः।
किकिदीविः स्मृतश्चाषः शकुंतो भास उच्यते ॥९२॥
भृंगः कलिंगो धूम्याटः सारंगश्चातको मतः।
व्याघ्राटस्तु भरद्वाजः शुकः कीर उदाहृतः ॥९३॥
आटिः शरारिराटिः स्यादुत्क्रोशः कुररो मतः।
दात्यूहो जलरंकुः स्यात्क्रौयष्टिः शिखरी स्मृतः ॥९४॥
बको बकोटो विज्ञेयो बलाका विसकंठिका।
आतायी शकुनिश्चिल्लो मुद्गः स्याज्जलवायसः ॥९५॥
हंसाः श्वेतच्छदाः प्रोक्ताश्चक्रांगा मानसौकसः।
वारला हंसकांता स्याद्वरला वरटा तथा ॥९६॥
आताम्रै राजहंसाश्च धार्तराष्ट्राः सितेतरैः।
मलिनैर्मल्लिकाख्याश्च कथ्यंते चरणाननैः ॥९७॥
पक्षैराधूसरैर्हंसाः कलहंसा इति स्मृताः।
प्रोच्यंते प्राचिकाः श्येनाश्चटिकाः क्षुद्रपक्षिकाः ॥९८॥
जीवंजीवकपिंजलचकोरहारीतवंजुलकपोताः।
कारंडवकादंबक्रकराद्याः पक्षिजातयो ज्ञेयाः ॥९९॥
मधुकरमधुपमधुव्रतशिलीमुखभ्रमरभृंगपुष्पलिहः।
इंदिंदिरालिषट्चरणचंचरीकालिनो द्विरेफाः स्युः ॥१००॥
झिल्लीका चीरी स्यात्सरघा मधुमक्षिका भवेत्क्षुद्रा।
लूतोर्णनाभमर्कटजालिककृमयश्च तुल्यार्थाः ॥१०१॥

पतंगः शलभः प्रोक्तः खद्योतो ज्योतिरिंगणः।
हालाहलश्चांजनिका ज्येष्ठा स्याद्गृहगोधिका ॥१०२॥
ग्रामः संवसथो ज्ञेयो ग्रामाधानं च खेटकं।
ग्रामीणास्तु निगद्यंते ग्राम्या ग्रामेयका इति ॥१०३॥
ग्रामांतिकमुपशल्यं पर्यंतः परिसरः कटः प्रोक्तः।
अवधिर्मर्यादा स्याद्‌आघाटः सीम सीमा च ॥१०४॥
अध्वा पंथाः पद्धतिरेकपदी वर्त्म वर्तनी सरणिः।
अयनं पदवी मार्गः पद्या च निगद्यते निगमः ॥१०५॥
ग्रामयोरंतरं दीर्घं प्रांतरं परिकीर्त्यते।
घोष आभीरपल्ली स्यात्पक्कणः शवरालयः ॥१०६॥
व्रजः स्याद्गोकुलं गोष्ठं गोवृंदं गोधनं धनं।
गोमान् गोमी च गोस्वामी गोविंदो ऽधिकृतो गवां ॥१०७॥
उक्षानड्वान्बलीवर्दः ककुद्मान्वृषभो वृषः।
ऋषभः सौरभेयो गौर्वाडवेयो ऽथ शाक्करः ॥१०८॥
तर्णकः स्मर्यते वत्सो दम्यो वत्सतरः स्मृतः।
आर्षभ्यः स च विज्ञेयः षंढत्वे यस्य योग्यता ॥१०९॥
महोक्षः स्यादुक्षतरो वृद्धोक्षस्तु जरद्गवः।
धुरं वहति यो धुर्यो धौरेयः स च कथ्यते ॥११०॥
स्थूरी स्यात्पृष्ठवाह्यस्तु स्कंधिकः स्कंधवाहकः।
असकृटस्तु ककुदं सास्ना स्याद्गलकंबलः ॥१११॥

नीचकी च शिरोदेशः स्कंधदेशो वहः स्मृतः।
नस्योतो नस्तितः प्रोक्तः षोडन् षड्दशनः स्मृतः।
भग्नशृंगस्तु तु कूटः स्याद्विषाणं शृंगमुच्यते ॥११२॥
अघ्न्या गौर्माहेयी सुरभिर्बहुला च सौरभेयी च।
उस्रार्जुनी च रोहिण्युक्तानडुही बुधैरनड्वाही ॥११३॥
वेहद्वृषभोपगता प्रष्ठौही गर्भिणी वशा बंध्या।
धेनुर्नवप्रसूता बष्कयणी प्रौढवत्सा स्यात् ॥११४॥
अवतोका स्रवद्गर्भा भद्रा गौर्गोमतल्लिका।
अचंडी सूरता प्रोक्ता वत्सकामा तु वत्सला ॥११५॥
ऊधः स्यादापीनं पीनोध्नी पीवरस्तनी प्रोक्ता।
श्रेष्ठा च नैचिकी स्यात् द्रोणदुघा प्रचुरदुग्धा च ॥११६॥
काल्योपसर्या प्रजने प्रसिद्धा परेष्टुका च प्रचरप्रसूतिः।
विजायते या प्रतिवत्सरं गौः समासमीनेति निगद्यते
सौ ॥११७॥
गृष्टिः सकृत्प्रसूता स्यात्पलिक्नी बालगर्भिणी।
गव्यं गोसंभवं सर्वं करीषं गोमयं स्मृतं ॥११८॥
ऊधस्यं क्षीरं स्याद्दुग्धं स्तन्यं पयश्च पीयूषं।
दधिसारं नवनीतं ब्रुवते हैयंगवीनं च ॥११९॥
तक्रमरिष्टमुदश्विद्दंडाहतकालशेयमथितानि।
द्रप्सं दध्यघनं स्यात्सर्पिर्घृतमाज्यमाघारः ॥१२०॥

शीनं स्त्यानं मृतं पक्कं विलीनं द्रुतमुच्यते।
मंथा मंथश्च मंथानो वैशाखः खजकस्तथा ॥१२१॥
संदानं दामनी दाम पशूनां बंधनं मतं।
अजः प्रोक्तः स्तभो वस्तश्छागश्छगलकश्छगः ॥१२२॥
वर्करः कथ्यते सद्भिः सर्वोऽपि तरुणः पशुः।
तूवरः शृंगहीनस्तु पुमानव्यंजनश्च यः ॥१२३॥
अविदूर्णायुरश्रो कुडुररणो वृष्णिमेषमेण्डाः स्युः।
अविसोढमविमरीसं स्यादविदूसं च दुग्धमवेः ॥१२४॥
दासेरकः क्रमेलक उष्ट्रो मयरवणाकरभशृंखलकाः।
बालेयश्चक्रीवान् खरगर्दभरासभाश्च तुल्यार्थाः ॥१२५॥
कौलेयकः सारमेयो भषणः श्वा च कुर्कुरः।
शुनको मृगदंशश्च बुधैः शालावृको मतः ॥१२६॥
मृगव्ये कुशलः श्वा च विश्वकद्रुरिति स्मृतः।
अलर्को रोगितो ज्ञेयः शुनकी सरमोच्यते ॥१२७॥
पशूनां षट्कसंख्यायां षड्गवं स्मर्यते बुधैः।
द्वित्वे च गोयुगं तेषां नामोच्चारणपूर्वकं ॥१२८॥
नीवृज्जनपदो देश उपवर्तनमिष्यते।
जनो लोकः प्रजा प्रोक्ता विषयो ग्रामसंख्यया ॥१२९॥
पत्तनं स्यादधिष्ठानं निगमः पुटभेदनं।
नगरं नगरी द्रंगः स्थानीयं पूः पुरी पुरं ॥१३०॥

स्कंधावार इति प्राज्ञै राजधानी निगद्यते।
शाखानगरमाख्यातं तथोपनगरं बुधैः॥१३१॥
विदेहा मिथिला प्रोक्ता काशिर्वाराणसी स्मृता।
अवंत्युज्जयिनी ज्ञेया कन्यकुब्जा महोदया॥१३२॥
हस्तिनखः परिकूटं च कथ्यते गोपुरं पुरद्वारं।
वप्रं शालं प्राकारमाकुररं कपाटं च॥१३३॥
प्रतोली विशिखा रथ्या मुखं निःसरणं स्मृतं।
शृंगाटकः पथां श्लेषः संस्थानं तु चतुष्पथं॥१३४॥
गृहभूमिस्तु वास्तुः स्याद्वाट आवेष्टको वृतिः।
गृहस्थानं स्मृतं राज्ञामुपकार्योपकारिका॥१३५॥
आवासावसथं गृहं च भवनं स्थानं निशांतं कुलं
संस्त्यायो निलयो निकाय्यमुटजं गेहं कुटं मंदिरं।
धिष्ण्यं धाम निकेतनं च सदनं पस्त्यं च वास्तु क्षयः
शाला वेश्म निवेशनोदवसिते प्रोक्ते च सद्मौकसी॥१३६॥
शरणमगारं निवसनमालय एकार्थवाचकाः शब्दाः।
अपवरकं गर्भगृहं संजवनं स्याच्चतुःशालं॥१३७॥
गृहमिष्टकादिरचितं प्रासादो देवतानरेंद्राणां।
आयतनं देवानामन्येषां धनवतां हर्म्यं॥१३८॥
सुधाधवलितं सौधं कुट्टिमं बद्धभूमिकं।
इंद्रकोशस्तमंगः स्याद्दृष्याट्टालको मतः॥१३९॥

पाकस्थानं रसवती कथ्यते तन्महानसं ।
उशंति शयनस्थानं वासागारं विशारदाः ॥१४०॥
आवेशनं शिल्पिशाला वाजिशाला तु मंडुरा ।
पण्यविक्रयशाला स्यादापणो विपणिस्तथा ॥१४१॥
कर्मशाला च कारूणामन्वासनमुदाहृतं ।
प्रपा पानीयशाला स्यात्सत्त्रशाला प्रतिश्रयः ॥१४२॥
उपघ्न आश्रयः प्रोक्तो मुनीनां स्थानमाश्रमः ।
मठश्च व्रतिनां स्थानं मंडपः स्याज्जनाश्रयः ॥१४३॥
वेश्मैकदेशः प्रघणः प्रघाणः स्यादलिंदकः ।
अजिरं प्रांगणं प्रोक्तं वेदिका च वितर्दिका ॥१४४॥
द्वार्द्वारं बलजं ज्ञेयमर्गला परिघः स्मृतः ।
उत्तरंगं मतं तिर्यक् द्वारस्योपरि दारु यत् ॥१४५॥
बुधैर्वंदनमाला तु तोरणं परिकीर्त्यते ।
आरोहणं स्यात्सोपानं निःश्रेणिरधिरोहिणी ॥१४६॥
गृहावग्रहणी प्रोक्ता देहली तु मनीषिभिः ।
संमार्जनी वर्धनी स्यात्संकरो ऽवकरः स्मृतः ॥१४७॥
आच्छादनं स्याद्वलभी गृहाणां गोपानसी दारु च वक्रसंस्थं ।
नीव्रं वलीकं पटलांतमाहुः कपोतपाली च

विटंकसंज्ञा ॥१४८॥

वातायनो गवाक्षश्च जालकं जालमुच्यते ।

कक्षांतरं प्रकोष्ठं च चंद्रशाला शिरोगृहं ॥१४९॥
स्वस्तिको वर्धमानश्च नंद्यावर्तादयस्तथा।
विच्छंदकविशेषाः स्युरमी भूपतिवेश्मनां ॥१५०॥
परिवारः परिकरः परिस्पंदः परिग्रहः।
तथोपकरणं प्रोक्तं परिवर्हः परिच्छदः ॥१५१॥
पर्यंकः शयनं शय्या तल्पं च तलिनं स्मृतं।
अपाश्रयस्तु विद्वद्भिः कथ्यते मत्तवारणः ॥१५२॥
प्रवेण्यास्तरणं वर्णः परिस्तोमः कुथः कुथा।
नवतं चेति तुल्यार्थाः प्रच्छदश्चोत्तरच्छदः ॥१५३॥
अपटी कांडपटः स्यात्प्रतिसीरा जवनिका तिरस्करिणी।
उच्छीर्षकमुपधानं धीरैरुपवर्हमाख्यातं ॥१५४॥
चंद्रोदयो वितानं स्यादुल्लोचः कदकस्तथा।
व्यंजनं तालवृंतं च विष्टरः पीठमासनं ॥१५५॥
वेत्रासनं तथासंदी कंकतं केशमार्जनं।
पादुकानुपदीना स्यादुपानत्पादरक्षणं ॥१५६॥
दर्वी तर्दूश्च खजिका कथ्यते दारुहस्तकः।
पेटां वदंति मंजूषां कुशूलं धान्यकोष्ठकं ॥१५७॥
अंबरीषो भवेद्भ्राष्ट्रः कंडुः स्वेदनिका स्मृता।
चुल्ल्यश्मंतकमुद्ध्मानं स्मृताधिश्रयणी बुधैः ॥१५८॥
अंगारशकटीं प्राकुर्हसंतीं च हसंतिकां।

उखा स्थाली चरुः कुंभी पिठरं कुंडमुच्यते ॥१५९॥
कटाहः कर्परो ज्ञेयो भृंगारः कनकालुका ।
शालाजिरो वर्धमानः शरावः स्मर्यते बुधैः ॥१६०॥
कोशिका मल्लिका प्रोक्ता पिधानं स्यादुदंचनं ।
घटः करीरः कलशः कुटः कुंभो निपः स्मृतः ॥१६१॥
कर्करी करकः प्रोक्तो वर्धनी च गलंतिका ।
गर्गरी मंथनी प्रोक्ता मणिकः स्यादलिंजरः ॥१६२॥
धान्याम्लमारनालं संधानं कांजिकं च सौवीरं ।
अभिषवमवंतिसोमं तुषोदकं शुक्तमिच्छंति ॥१६३॥
अंधः कूरं भक्तं दिदीविरन्नं तथौदनो भिस्सा ।
अशनं स्यादाहारः पूपापूपौ च पूपलिका ॥१६४॥
यवागूरुष्णिका श्राणा तरला च विलेपिका ।
क्षैरेयी पायसं प्रोक्तं परमान्नं च सूरिभिः ॥१६५॥
मिष्टान्नं व्यंजनं ज्ञेयं वेषवार उपस्करः ।
दधिमंडो भवेन्मस्तु करंभो दधिसक्तवः ॥१६६॥
दाधिकं संस्कृतं दध्ना सार्पिषं सर्पिषा स्मृतं ।
लवणोदकसंसिद्धमुदलावणिकं मतं ॥१६७॥
अंगारेषु विपक्कं मांसं भूतिर्भट्टकं भृष्टं ।
उख्यमुखासंसिद्धं शूले शूल्यं भटित्रं च ॥१६८॥
किलाटः कूर्चिका चेति क्षीरस्य विकृती उभे ।

कक्षांतरं प्रकोष्ठं च चंद्रशाला शिरोगृहं ॥१४९॥
स्वस्तिको वर्धमानश्च नंद्यावर्तादयस्तथा ।
विच्छंदकविशेषाः स्युरमी भूपतिवेश्मनां ॥१५०॥
परिवारः परिकरः परिस्पंदः परिग्रहः ।
तथोपकरणं प्रोक्तं परिवर्हः परिच्छदः ॥१५१॥
पर्यंकः शयनं शय्या तल्पं च तलिनं स्मृतं ।
अपाश्रयस्तु विद्वद्भिः कथ्यते मत्तवारणः ॥१५२॥
प्रवेण्यास्तरणं वर्णः परिस्तोमः कुथः कुथा ।
नवतं चेति तुल्यार्थाः प्रच्छदश्चोत्तरच्छदः ॥१५३॥
अपटी कांडपटः स्यात्प्रतिसीरा जवनिका तिरस्करिणी ।
उच्छीर्षकमुपधानं धीरैरुपवर्हमाख्यातं ॥१५४॥
चंद्रोदयो वितानं स्यादुल्लोचः कदकस्तथा ।
व्यंजनं तालवृंतं च विष्टरः पीठमासनं ॥१५५॥
वेत्रासनं तथासंदी कंकतं केशमार्जनं ।
पादुकानुपदीना स्यादुपानत्पादरक्षणं ॥१५६॥
दर्वी तर्दूश्च खजिका कथ्यते दारुहस्तकः ।
पेटां वदंति मंजूषां कुशूलं धान्यकोष्ठकं ॥१५७॥
अंबरीषो भवेद्भ्राष्ट्रः कंडुः स्वेदनिका स्मृता ।
चुल्ल्यश्मंतकमुद्ध्मानं स्मृताधिश्रयणी बुधैः ॥१५८॥
अंगारशकटीं प्राहुर्हसंतीं च हसंतिकां ।

उखा स्थाली चरुः कुंभी पिठरं कुंडमुच्यते ॥१५९॥
कटाहः कर्परो ज्ञेयो भृंगारः कनकालुका।
शालाजिरो वर्धमानः शरावः स्मर्यते बुधैः ॥१६०॥
कोशिका मल्लिका प्रोक्ता पिधानं स्यादुदंचनं।
घटः करीरः कलशः कुटः कुंभो निपः स्मृतः ॥१६१॥
कर्करी करकः प्रोक्तो वर्धनी च गलंतिका।
गर्गरी मंथनी प्रोक्ता मणिकः स्यादलिंजरः ॥१६२॥
धान्याम्लमारनालं संधानं कांजिकं च सौवीरं।
अभिषवमवंतिसोमं तुषोदकं शुक्तमिच्छंति ॥१६३॥
अंधः कूरं भक्तं दिदीविरन्नं तथौदनो भिस्सा।
अशनं स्यादाहारः पूपापूपौ च पूपलिका ॥१६४॥
यवागूरुष्णिका श्राणा तरला च विलेपिका।
क्षैरेयी पायसं प्रोक्तं परमान्नं च सूरिभिः ॥१६५॥
मिष्टान्नं व्यंजनं ज्ञेयं वेषवार उपस्करः।
दधिमंडो भवेन्मस्तु करंभो दधिसक्तवः ॥१६६॥
दाधिकं संस्कृतं दध्ना सार्पिषं सर्पिषा स्मृतं।
लवणोदकसंसिद्धमुदलावणिकं मतं ॥१६७॥
अंगारेषु विपक्वं मांसं भूतिर्भट्टाटकं भृष्टं।
उख्यमुखासंसिद्धं शूले शूल्यं भटित्रं च ॥१६८॥
किलाटः कूर्चिका चेति क्षीरस्य विकृती उभे।

फाणितविकृतिर्गौडी मत्स्यंडी खंडशर्करा: ॥१६९॥
वल्भनमभ्यवहार: प्रत्यवसानं च जेमनं जग्धि: ।
खादनमशनं भक्षणमाहारो भोजनं स्वदनं ॥१७०॥
पर्याप्तमुपसंपन्नं तृप्ति: सौहित्यमुच्यते ।
विघसो भुक्तशेषं स्याद्भुक्तोच्छिष्टं तु फेलिका ॥१७१॥
अमत्रं भाजनं पात्रं स्थालं तुल्यार्थमिष्यते ।
गल्वर्कश्चानुतर्षश्च चषक: सरक: स्मृत: ॥१७२॥
आपानं पानगोष्ठी स्यात्सपीति: सहपानकं ।
उपदंशावदंशौ च चक्षणं संप्रचक्षते ॥१७३॥
मद्यासव: शीधु सुरा प्रसन्ना परिस्रुता स्यान्मदिरा मदिष्ठा ।
कादंबरी स्वादुरसा च शुंडा गंधोत्तमा माधवकश्च
हाला ॥१७४॥
कल्यं कश्यं तथा मद्यं मैरेयं कापिशायनं ।×
माध्वीकमासव: प्रोक्त: परिस्रुद्वारुणी मधु ॥१७५॥
मनुष्यो मानुषो मर्त्यो मनुजो मानवो नर: ।
पुमान्पंचजनो ना च पुरुष: पूरुषश्च विट् ॥१७६॥
धीरो धीमान् लब्धवर्णो विपश्चित्
वृद्धो विद्वान् प्राप्तरूपो ऽभिरूप: ।
सूरि: प्राज्ञ: पंडित: सन्मनीषी
ज्ञो दोषज्ञ: कोविद: स्यात्प्रबुद्ध: ॥१७७॥

चेलादीन्युत्तरपदे वर्तमानानि कुत्सितमाहुः, न पृथक्‌ वदन्ति सन्तीति विवेकः। चेलक्नेट ... (२।२।१२८) इति सूत्राज्ज्ञापकात्।

बुधः सुधीः कृती कृष्टिः कविर्व्यक्तो विशारदः।
विचक्षणश्च मेधावी संख्यावान्मतिमान्मतः॥१७८॥
प्रेक्षा प्रज्ञा प्रतिभा धीर्धिषणा शेमुषी मनीषा च।
बुद्धिर्मतिश्च मेधा संख्या संवित्तिरुपलब्धिः॥१७९॥
चतुरः स्यात्क्षेत्रज्ञः कृतहस्तः कृतमुखश्च कृतकर्मा।
दक्षः कुशलोऽभिज्ञो निष्णातः शिक्षितः प्रवीणश्च॥१८०॥
वैधेयो बालिशो बालो जडो जाल्मो यथोद्गतः। यथाजात इति तु इति ... तराम्।
मूढो मंदो विवर्णश्च मूर्खः स्यान्मातृशासितः॥१८१॥
अर्वाणमणकमपसदमवममवद्यं निकृष्टमपकृष्टं।
अधमं चेलं कांडं खेटं पापं च रेफसं प्राकुः॥१८२॥
ऐकागारिकतस्करदस्युप्रतिरोधकाः परास्कंदी।
चौरो मलिम्लुचः स्यात्परिमोषी पारिपंथिकः स्तेनः॥१८३॥
पश्यतो यो हरत्यर्थं स चौरः पश्यतोहरः।
द्रव्यं ह्यपहृतं लोप्त्रं स्तेयं चौर्यमिति स्मृतं॥१८४॥
पाटच्चरः पटचौरो बद्धो नद्धश्च संयतः।
क्षेमंकरो रिष्टतातिः शिवतातिः शिवंकरः॥१८५॥
परवांस्तु पराधीनो निघ्नः परवशस्तथा।
परतंत्रः परायत्तः परच्छंदश्च गृह्यकः॥१८६॥
कठोरः कठिनः क्रूरः कक्खटः कर्कशो दृढः।
उच्यते बहुलः स्थूलः पीनः पीवा च पीवरः॥१८७॥

अर्यः परिवृढः स्वामी प्रभुर्नेता च नायकः।
अधिभूरधिपः प्रोक्तो ह्यधीशोऽधिपतिस्तथा ॥१८८॥
तपस्वी संयतः शांतो मुनिर्लिंगी यतिर्व्रती।
रजोहरणधारी च श्वेतवासाः सितांबरः ॥१८९॥
नग्नाटो दिग्वासाः क्षपणः श्रमणश्च जीवको जैनः।
आजीवो मलधारी निर्ग्रंथः कथ्यते सद्भिः ॥१९०॥
दुर्जनः पिशुनः क्षुद्रो नीचः कर्णेजपः खलः।
दोषग्राही पुरोभागी द्विजिह्वो मत्सरी मतः ॥१९१॥
कदर्यहीनकीनाशकिंपचा च मितंपचाः।
कृपणक्षुल्लकक्लीवक्षुद्रा एकार्थवाचकाः ॥१९२॥
क्षुद्रदरिद्राकिंचनदुर्विधदुःस्थाश्च दुर्गताः प्रोक्ताः।
इतरप्राकृतपामरपृथग्जना वर्वराश्च तुल्यार्थाः ॥१९३॥
दांडाजिनिकः कुहकः कार्पटिको जालिकश्च कौसृतिकः।
धूर्तो व्यंसक उक्तो मायावी मायिको मायी ॥१९४॥
आद्यूनः स्यादौदरिको भक्षको घस्मरोऽद्मरः।
तमसेचनकं प्राकुस्तृप्तिर्यस्य न जायते ॥१९५॥
परान्नः परपिंडादः परजातः परैधितः।
सर्वान्नीनः सर्वभक्षो मांसादी शौष्कलः स्मृतः ॥१९६॥
उच्यते प्रवणः प्रह्वस्तत्परश्च परायणः।
व्युत्पन्नः प्रहतः क्षुण्णः संस्कृतश्च निगद्यते ॥१९७॥

लोलुभं लोलुपं लोलं लालसं लंपटं विदुः।
प्रतूर्णस्त्वरितस्तूर्ण उत्सुकः प्रसृतः स्मृतः। ॥१९८॥
शूरो वीरश्च विक्रांतो भटश्चारभटो भवेत्।
दरितश्चकितो भीतस्त्रस्तो भीरुश्च कातरः ॥१९९॥
क्षुभितः शंकितश्चेति नातिनानार्थवाचकाः।
महोत्साहो महोद्योगो महेच्छः स्यान्महामनाः ॥२००॥
उदात्तश्च तथोदीर्णो महात्मोदार उच्यते।
आढ्यः समृद्धो धनवानिन ईशो धनीश्वरः ॥२०१॥
अभ्यागारिकमिच्छंति कुटुंबव्यापृतं जनाः।
पांथो ऽध्वगो ऽध्वनीनः स्यादध्वन्यः पथिकस्तथा ॥२०२॥
जंघालो जवनो वेगी पाथेयं शंबलं स्मृतं।
आवेशिकः प्राघुणक आगंतुरतिथिः स्मृतः ॥२०३॥
आतिथेयं तथातिथ्यमातिथेयी च कथ्यते।
अर्थी मार्गणकः प्रोक्तो याचकश्च वनीपकः ॥२०४॥
अध्येषणैषणा याञ्चा याचना प्रार्थना स्मृता।
क्षुद्वान्बुभुक्षितः प्सातो जिघत्सुः क्षुधितस्तथा ॥२०५॥
अशनाया बुभुक्षा प्सा जिघत्साक्षुत्क्षुधाः समाः।
कोपनः क्रोधनः क्रोधी रोषणः स्यादमर्षणः ॥२०६॥
कोपः क्रोधस्तथामर्षो रोषः प्रतिघ उच्यते।
तृषितस्तर्षितः प्रोक्तः पिपासुश्च पिपासितः ॥२०७॥

उदन्या तर्षतृट्तृष्णापिपासाश्च समाः स्मृताः।
तृष्णको गर्धनो गृध्नुर्लिप्सुर्लुब्धो ऽभिलाषुकः॥२०८॥
तृष्णाभिलाषो लिप्साशा धनाया गर्धनोच्यते।
अधरो हीनवादी स्यात्प्रसक्तः प्रसृतः स्मृतः॥२०९॥ प्रसित इति पाठः।
दासो दासेरकश्चेटो भुजिष्यः किंकरो मतः।
श्लक्ष्णो मधुरवाक् प्रोक्तः स्थूललक्षो बहुव्ययी॥२१०॥
प्रियवाग्दानशीलश्च वदान्यः परिकीर्तितः।
भवेदक्षिगतो द्वेष्यः प्रणाय्यो ऽसंमतो मतः॥२११॥
चक्षुष्यः सुभगो ज्ञेयो वल्लभो दयितः प्रियः।
गेहेनर्दी गेहेशूरः पिंडीशूरश्च कथ्यते॥२१२॥
स्थानस्थो यो परान् द्वेष्टि गोष्ठश्वं तं विदुर्बुधाः।
असौ पंचजनीनः स्याद्यो भांडादिरतो नरः॥२१३॥
वैरंगिको विरागार्हो धनवानस्तिमान्मतः।
प्रेष्यः प्रोक्तः परिस्कंदः कर्मशूरश्च कर्मठः॥२१४॥
अलंकर्मीण इत्युक्तः कर्मशीलस्तु यः पुमान्।
उत्तालस्त्वरितो ज्ञेयो विश्रब्धः स्थिर उच्यते॥२१५॥
तीक्ष्णोपायेन यो ऽन्विच्छेत्स आयःशूलिको मतः।
अरुंतुदः स्याद्व्यथको वियातो धृष्ट उच्यते॥२१६॥
शरारुर्घातको हिंस्रो नृशंसः क्रूरकर्मकृत्।
साधुः सज्जन आर्यः स्याद्गृहमेधी गृहाधिपः॥२१७॥

कुशाग्रीयमतिः प्रोक्तः सूक्ष्मदर्शी च यः पुमान्।
चिद्रूपः स्यात्सहृदयः सहस्तः शिक्षितायुधः ॥२१८॥
सुमुखः स खलु प्रोक्तो यो वक्ति प्रतिभान्वितः।
नीलीरागः स विज्ञेयः स्थिरप्रेमा च यः पुमान् ॥२१९॥
क्षणमात्रानुरागी च हरिद्राराग उच्यते।
शाली अयानधृष्टौ च प्रोक्तौ शालीनशारदौ ॥२२०॥
दूरार्थानर्थसंदर्शी दीर्घदृष्टिः प्रकीर्तितः।
प्रत्युत्पन्नमतिर्ज्ञेयस्तत्कालोत्पन्नधीर्नरः ॥२२१॥
यज्ञविघ्नो दैवपरो यद्वदः स्यादनुत्तरः।
अज्ञो मातृमुखः प्रोक्तो दुर्मुखो मुखरः स्मृतः ॥२२२॥
कद्वदो गर्ह्यवादी स्यात्कद्वरः कुत्सितो भवेत्।
प्रकांडोद्घौ प्रशंसायामाक्षेपे हतकः स्मृतः ॥२२३॥
अहंयुः स्यादहंकारी शुभंयुः शुभसंयुतः।
यथाकामी स्वरुचिः स्यात्स्वच्छंदो निरवग्रहः ॥२२४॥
अन्वेष्टानुपदी प्रोक्तः प्रतिभूर्लग्नकः स्मृतः।
रोगादुन्मुक्त उल्लाघः कल्यो वार्त्तो निरामयः ॥२२५॥
जैवातृकः स्यादायुष्मान् बलवानंसलो मतः।
जाबालः स्यादजाजीवः कम्रः कामी च कामुकः ॥२२६॥
वेश्यापतिर्भुजंगः स्याद्विटः पल्लवकः स्मृतः।
विहस्तो व्याकुलः प्रोक्तः कुंठो मंदः क्रियासु यः ॥२२७॥

क्रियावान् कर्मसूद्युक्तो दीर्घसूत्रो जडक्रियः।
निकृतो विप्रलब्धः स्यात्समुन्नद्धो ऽतिगर्वितः॥२२८॥
प्रतीक्ष्यः कथ्यते पूज्यः पूजितो ऽपचितो भवेत्।
ईर्ष्यालुः कुहनः प्रोक्तो जारो ह्युपपतिः स्मृतः॥२२९॥
सरलो दक्षिणो ज्ञेयो विदग्धश्छेक उच्यते।
उत्पश्यमुन्मुखं विद्यात् न्युब्जं विद्यादधोमुखं॥२३०॥
आसीन उपविष्टः स्यादूर्ध्व ऊर्ध्वंदमः स्थितः।
क्षीबो मत्तः क्षमः शक्तः प्रगल्भः प्रौढ उच्यते।
उत्क उत्कंठितः प्रोक्तो विक्लवो विह्वलः स्मृतः॥२३१॥
अलसः शीतको मंदो जडो जिह्मश्च मंथरः।
पोगंडो विकलांगः स्याल्लोहलो ऽव्यक्तवाग्भवेत्॥२३२॥
कितवः स्यात् द्यूतकारो द्यूतमक्षवती भवेत्।
अक्षो दुरोदरं प्रोक्तं सभिको द्यूतकारकः॥२३३॥
परीक्षकः कारणिको गृह्यः पक्ष उदाहृतः।
अभिजातः कुलीनः स्यात्कुचरः कुटिलाशयः॥२३४॥
निषादिनो गजारोहा अश्वारोहास्तु सादिनः।
रथिनः स्यंदनारोहा नावारोहास्तु नाविकाः॥२३५॥
ब्राह्मणो वाडवो विप्रो भूमिदेवो द्विजोत्तमः।
अग्रजन्मा द्विजन्मा च षट्कर्मा सोमपा द्विजः॥२३६॥
ब्राह्मणः क्षत्रियो वैश्यस्त्रयो वर्णा द्विजातयः।

शूद्रस्तुरीयवर्णः स्यात्तद्भेदास्त्वंत्यजाः स्मृताः ॥२३७॥
ब्रह्मचार्यादयो वेदे प्रोक्ताश्चत्वार आश्रमाः ।
शूद्रो ऽगृहस्थ एव स्यात्क्षत्रियो न यतिर्भवेत् ॥२३८॥
ब्रह्मचारी भवेद्वर्णी गृहस्थः स्नातकस्तथा ।
वैखानसो वानप्रस्थः कर्मसंन्यासिको यतिः ॥२३९॥
अनूचानः सर्ववेदः श्रोत्रियश्छांदसो मतः ।
प्राख्यातात्पितुरुत्पन्न आमुष्यायण इष्यते ॥२४०॥
अन्ववायो ऽन्वयो वंशो गोत्रं चाभिजनः कुलं ।
चरित्रं चरितं शीलं चारित्रं च समं स्मृतं ॥२४१॥
वृत्ताध्ययनसंपत्तिरिष्यते ब्रह्मवर्चसं ।
ब्रह्मचर्यं बुधाः प्राहुः समस्तेंद्रियसंयमं ॥२४२॥
संज्ञेय उपसंग्राह्यो यो ऽभिवाद्यो यथाविधि ।
उपसंग्रहणं चापि प्राहुः संतो ऽभिवादनं ॥२४३॥
निवृत्तेंद्रियलौल्यस्तु श्रांतः शांतश्च कथ्यते ।
तपःक्लेशसहो दांतो क्षांतर्वाणिश्च शास्त्रवित् ॥२४४॥
अध्यापक उपाध्यायो व्याख्या विवरणं स्मृतं ।
शिष्यांतेवासिनौ छात्रः शैक्षः प्राथमकल्पिकः ॥२४५॥
विघ्नो ऽंतरायः प्रत्यूहो व्यवायश्च प्रकीर्तितः ।
साकल्यवचनं प्राज्ञैः पारायणमुदाहृतं ॥२४६॥
आम्नायः संप्रदायः स्यात्पारंपर्यं गुरुक्रमः ।

प्रयतः स्यादनुच्छिष्टः संशितश्च सुनिश्चितः ॥५४७॥
सांवत्सरो ज्योतिषिको ज्ञानी मौहूर्तिकस्तथा।
कार्तांतिकस्तु दैवज्ञ आदेशी गणकः स्मृतः ॥५४८॥
व्रात्यः संस्कारहीनः स्यादवकीर्णी क्षतव्रतः।
शिश्विदानो ऽदुराचारस्त्यक्ताग्निर्वीरहा द्विजः ॥५४९॥
धर्मध्वजो लिंगवृत्तिरस्वाध्यायो निराकृतिः।
शस्त्राजीवः कांडस्पृष्टो ब्रह्मबंधुर्द्विजो ऽधमः ॥५५०॥
जातिमात्रोपजीवी च कथ्यते ब्राह्मणब्रुवः।
अब्रह्मण्यमवध्यं स्यात् ब्रह्मण्यं ब्रह्मणे हितं ॥५५१॥
उपवीतं ब्रह्मसूत्रं प्रक्षिप्तं दक्षिणे करे।
प्राचीनावीतमन्यस्मिन्निवीतं कंठलंबितं ॥५५२॥
आचमनमुपस्पर्शनमाप्लवनं स्नानमिष्यते सवनं।
निर्णिक्तं प्रक्षालितमाकुधौतं च तुल्यार्थं ॥५५३॥
पाराशरी व्रती भिक्षुर्मस्करी पारिरक्षिकः।
परिव्राजिकस्तपस्वी कर्मंदी तापसः स्मृतः ॥५५४॥
वैकक्षमुत्तरासंगः प्रोक्ता वृहतिका तथा।
पर्यस्तिका परिकरः पर्यंकश्चेति कथ्यते ॥५५५॥
कक्षापटः स्यात्कौपीनं कुंडिका च कमंडलुः।
आषाढो व्रतिनां दंडो व्रतिनामासनं वृषी ॥५५६॥
ऋषिस्त्रिकालदर्शी स्यान्मुनिर्वाचंयमो मतः।

प्राचेतसस्तु वाल्मीकिर्मैत्रावरुण उच्यते ॥२५७॥
उक्तो ऽगस्तिरगस्त्यो लोपामुद्रापतिश्च घटयोनिः।
सात्यवतेयः पाराशर्यो द्वैपायनो व्यासः ॥२५८॥
यागो यज्ञः क्रतुः स्तोमः सप्ततंतुर्मखो ऽध्वरः।
वितानं संस्तरो बर्हिः सवः सत्त्रं च कथ्यते ॥२५९॥
निर्मंथकाष्ठमरणिः प्रणीतो ऽग्निश्च संस्कृतः।
वेदी परिष्कृता भूमिः पात्रमुक्तं स्रुगादिकं ॥२६०॥
हव्यपाकश्चरुः प्रोक्तः संनाय्यं हविरुच्यते।
शृते क्षीरे दधि क्षिप्तमामिक्षा कथ्यते बुधैः ॥२६१॥
उपाकृतस्तु विज्ञेयो मंत्रेण प्रोक्षितः पशुः।
हुतं वषट्कृतं ज्ञेयं यज्ञांतो ऽवभृथः स्मृतः ॥२६२॥
बृहस्पतिसवेनेष्टं येनासौ स्थपतिर्भवेत्।
सर्ववेदास्तु विज्ञेयो दत्तसर्वस्वदक्षिणः ॥२६३॥
विश्राणनं विहापितमंहतिरपवर्जनं वितरणं च।
निर्वपणं च स्पर्शनमुत्सर्गः स्यात्प्रदेशनं दानं ॥२६४॥
यष्टा च यजमानः स्याददेष्टा दीक्षितो व्रती।
इज्याशीलो यायजूको यज्वा स्यादासुतीवलः ॥२६५॥
राजा राजन्यो राट् प्रजापतिः क्षत्रियो नृपः क्षत्रं।
मूर्धाभिषिक्तभूपतिपार्थिवनरदेवलोकपालाः स्युः ॥२६६॥
येनेष्टं राजसूयेन स सम्राट् परिकीर्तितः।

× अमरे तु यथार्थवर्णो इति पाठः स्थितः।

चक्रवर्ती सार्वभौमो मध्यमो मंडलेश्वरः ॥२६७॥
आतपत्रं भवेच्छत्त्रं चामरं तु प्रकीर्णकं।
हैमं सिंहासनं राज्ञां स्मृतं भद्रासनं बुधैः ॥२६८॥
द्वाःस्थो दौवारिकः क्षत्ता दंडी वेत्रधरस्तथा।
उत्सारको द्वारपालः प्रतीहारो बुधैः स्मृतः ॥२६९॥
अपसर्पश्चरश्चारः प्रणिधिर्गूढपूरुषः।
× यथार्थवर्णो मंत्रज्ञः स्पशो हेरक उच्यते ॥२७०॥
मंत्री बुद्धिसहायः स्यादमात्यः सचिवस्तथा।
सौवस्तिक इति प्रोक्तः पुरोधाश्च पुरोहितः ॥२७१॥
महा[illegible]ः प्रधानं स्याद्ध्यक्षो ऽधिकृतः स्मृतः।
सौविदः सौविदल्लश्च स्थापत्यः कंचुकी मतः ॥२७२॥
मित्रं सखा वयस्यश्च सुहृत्स्निग्धश्च कथ्यते।
अनुजीवी सहायः स्यात्सेवको ऽनुचरो ऽनुगः ॥२७३॥
प्राड्विवाको ऽक्षदर्शः स्थेयो न्यायो ऽक्ष इति कथ्यते।
अंतःपुरेष्वधिकृतः स्मृतो ऽंतर्वंशिको नरः ॥२७४॥
क्लीवो वर्षधरः षंढः पंडकश्च नपुंसकः।
उभयव्यंजनं पोठा तृतीया प्रकृतिः स्मृता ॥२७५॥
आरालिकः सूपकारः सूदः स्याद्बल्लवस्तथा।
पौरोगवस्तु विज्ञेयः सूदाध्यक्षो मनीषिभिः ॥२७६॥
वैहासिकः केलिकिलो बुधैर्वासंतिको मतः।

उभयव्यञ्जना पोटेति अमरो (२।१।६४)।

अप्रमरस्तु आच्छोदनमिति पठति।

परिहासो द्रवो नर्म केलिः क्रीडा च खेलनं ॥१७७॥
रक्षिवर्गो ह्यनीकस्थः सेनानीर्वाहिनीपतिः।
अर्थागमो भवेदायो भागधेयो बलिः करः ॥१७८॥
उपदा प्राभृतं प्रोक्तमुपग्राह्यमुपायनं।
लंचोत्कोचमुपादानमुपचारस्तथामिषं ॥१७९॥
प्रबोधका मागधवंदिसूता वैतालिका मंगलपाठकाश्च।
× अच्छोटनं स्यान्मृगया मृगव्यं पापर्द्धिराखेटक इत्यभिन्नं ॥१८०॥
अर्वा गंधर्वो ऽश्वः सप्तिर्वाजी तुरंगमस्तुरगः।
तार्क्ष्यो हरिस्तुरंगो ययुरुक्तो घोटको हयो वाहः ॥१८१॥
गुणदेशकृतास्तेषां संज्ञाः स्युरनेकधा लोके।
✓ कर्कः श्वेतः शोणो रक्तो हेमश्च कृष्णवर्णो ऽश्वः ॥१८२॥
मल्लिकाक्षः सितैर्नेत्रैः कृष्णैरिंद्रायुधो मतः।
श्रीवृक्षकी स विज्ञेयः श्रीवृक्षो यस्य लांछनं ॥१८३॥
आजानेयाः कुलीनाः स्युः पारसीका वनायुजाः।
कांबोजा वाह्लिकाः प्रोक्ताः सैंधवाः सिंधुपारजाः ॥१८४॥
शूलको दुर्विनीतो ऽश्वः पोतः प्रोक्तः किशोरकः।
अर्वती वडवा वामी प्रसूता वाजिनी स्मृता ॥१८५॥
लूनं पुच्छं तु लांगूलं वालहस्तश्च वालधिः। लूम इति पाठः।
प्रोथ इत्युच्यते घोणा मध्यं कश्यं खुरः शफः ॥१८६॥ शफं क्लीबे खुरः पुमान् इति व्याख्या
पर्याणं स्यात्पल्ययनं खलीनं कविकं स्मृतं।
/ अप्रमरस्तु कविके ति स्त्रियां पठति

चर्मदंडः कशा प्रोक्ता वल्गारश्मिकुशाः स्मृताः ॥२८७॥
रंहस्तरः स्यदः स्यात्प्रसरो वेगो रयो जवो वाजः।
पांशुः क्षोदो रेणुश्चूर्णं धूली रजश्च तुल्यार्थाः ॥२८८॥
अनः शतांगः शकटः स्यंदनः कथ्यते रथः।
गंत्री कंबलवाह्यस्तु कूवरी च निगद्यते ॥२८९॥
योग्यारथो वैनयिको ह्यध्वन्यः पारियानिकः।
कर्णीरथः प्रवहणं डयनं चेति कथ्यते ॥२९०॥
देवतार्थो देवरथो युद्धार्थः सांपरायिकः।
क्रीडारथः पुष्परथो जेता जैत्ररथः स्मृतः ॥२९१॥
चक्रं रथांगमाख्यातं कूवरं च युगंधरं।
चक्रधारा प्रधिर्नेमिर्नाभिश्चक्रस्य पिंडिका ॥२९२॥
अपस्करो रथांगः स्यादणिरक्षाग्रकीलिका।
नियंता प्राजिता क्षत्ता दक्षिणस्थश्च सारथिः ॥२९३॥
सव्येष्ठः कथ्यते सूतो वरूथं रथगोपनं।
वाहनं धोरणं युग्यं यानं पत्त्रमिति स्मृतं ॥२९४॥
शिविका याप्ययानं स्याद्वेसरो ऽश्वतरो मतः।
पदातपत्तिपादातपदातिकपदातयः।
पद्गश्च पदगश्चेति कथ्यंते पादचारिणः ॥२९५॥
दूष्यं स्थुलं पटकुटी गुणलयनी केणिका च निर्दिष्टा।
ध्रुवकः शिवकः शंकुः पुष्पलकः कीलकः प्रोक्तः ॥२९६॥

यात्रा प्रयाणं प्रस्थानं निवेशः शिबिरं स्मृतं।
अवस्कंदः प्रपातश्च सौप्तिकं च निगद्यते ॥२९७॥
संग्रामः समितिः समिच्च समरं संख्यं समीकं रणं
युद्धं युत्प्रधनं मृधं समुदयः संयत्कलिः संयुगं।
द्वंद्वायोधनसंप्रहारकलहाक्रंदाहवाभ्यागमाः
संस्फोटप्रविदारणप्रहरणानीकाजयः संगरः ॥२९८॥
संपरायः समाघातः प्रघातश्च समाह्वयः।
जन्यं स्यादभिसंपातः संमर्दो विग्रहस्तथा ॥२९९॥
अभियातिररातिरमित्ररिपू प्रतिपक्षविपक्षविरोध्यरयः।
अहितो ऽसहनश्च जिघांसुरिति प्रथिताः परिपंथिपरा
सुहृदः ॥३००॥
प्रत्यर्थी पर्यवस्थाता द्वेषी वैरी च शात्रवः।
शत्रुः सपत्नो भ्रातृव्यः प्रत्यनीको द्विषन्मतः ॥३०१॥
पृतना सेना ध्वजिनी पताकिनी वाहिनी बलं सैन्यं।
चक्रं चमूर्वरूथिन्यनीकिनी स्यादनीकं च ॥३०२॥
वैजयंती पताका च केतुः स्यात्केतनं ध्वजः।
अस्योचूलावचूलाख्यावूर्ध्वाधोमुखकूर्चकौ ॥३०३॥
संनाहः कवचं वर्म तनुत्राणमुरश्छदः।
जगरः कंकटो माठी दंशनं जालिका स्मृता ॥३०४॥
खेटकं फलकं चर्म प्रोक्तमावरणं बुधैः।

तूणोपासङ्ग तूणीर निषङ्ग । इषुधिर्द्वयोरित्यमरे तूणीरः पुमान् । तूणश्च ।

वर्मितः स्यात्कवचितः संनद्धो दंशितस्तथा ॥३०५॥
सर्वाभिसारमिच्छंति सर्वसंनहनं बुधाः ।
यत्सेनयाभिनिर्याणं स्मृतं तदभिषेणनं ॥३०६॥
हेतिः शस्त्रं प्रहरणमायुधमस्त्रं चतुर्विधं तच्च ।
मुक्तामुक्तममुक्तं करमुक्तं यंत्रमुक्तं च ॥३०७॥
शक्त्यादि पाणिमुक्तं स्यादमुक्तं क्षुरिकादिकं ।
मुक्तामुक्तं तु यष्ट्यादि यंत्रमुक्तं शरादिकं ॥३०८॥
अस्त्रं धनुरिष्वासं कोदंडं धन्व कार्मुकं चापं ।
बाणासनं द्रुणा स्यान्मौर्वी ज्या सिंजिनी गुणो जीवा ॥३०९॥
तूणीरमुपासंगस्तूणं तूणी निषंग इषुधिश्च ।
बाणाश्रयः कलापः कार्मुककोटिर्भवेदटनिः ॥३१०॥
कंकपत्त्रशरमार्गणबाणाश्चित्रपुंखविशिखेषुकलंबाः ।
सायकप्रदरकांडपृषत्काः पत्त्रिणः खगशिलीमुखरोपाः ॥३११॥
सर्वायसस्तु बाणः प्रक्ष्वेडन एषणश्च नाराचः ।
तीरितडलदंडासनादयः कांडभेदाः स्युः ॥३१२॥
पत्त्रपाली भवेद्वाजः कर्तरी पुंख उच्यते ।
वेध्यं लक्ष्यं शरव्यं च निमित्तं च समं विदुः ॥३१३॥
अर्धचंद्रक्षुरप्रादि धाराग्रं मुखमुच्यते ।
आराग्रं तु मुखं तेषां पुष्पपत्त्रादिभेदतः ॥३१४॥
बाणमुक्तिर्व्यवच्छेदो दीप्तिर्वेगस्य तीव्रता ।

अभ्यासः कथ्यते योग्या श्रमस्थानं खलूरिका ॥३१५॥
लघुहस्तः शीघ्रवेधी कृतपुंखस्तु शिक्षितः।
स भवेदपराङ्मुखर्यस्य लक्ष्याच्युतः खगः॥३१६॥
निस्त्रिंशः करवालः खड्गः कौक्षेयकः कृपाणः स्यात्।
रिष्टिरसिचंद्रहासौ तरवारिर्मंडलाग्रं च ॥३१७॥
कोशः प्रत्याकारः खड्गपिधानं त्सरुर्भवेन्मुष्टिः।
असिपुत्रिकासिधेनुः क्षुरिका पत्त्रं च शस्त्रिका ज्ञेया ॥३१८॥
परश्वधः कुठारः स्यात्परशुः स्वधितिस्तथा।
निशातं निशितं धौतं तेजितं च समं स्मृतं ॥३१९॥
प्रासो निगदितः कुंतो मुद्गरो द्रुघणः स्मृतः।
क्रकचं करपत्त्रं स्यात्परिघः परिघातनः॥३२०॥
यष्टिपट्टिसडुःस्फोटमुखंडीशंकुशक्तयः।
भिंदमालगदादंडचक्राद्याः शस्त्रजातयः॥३२१॥
मारणं निशरणं निवर्हणं सूदनं निरसनं निशुंभनं।
घातनं प्रशमनं प्रमापणं वर्जनं विशसनं प्रवासनं ॥३२२॥
निर्वापणनिर्वासनकदनव्यापादनानि तुल्यानि।
निर्ग्रंथनमालंभः प्रमया हिंसा च संज्ञपनं ॥३२३॥
नष्टो गृहीतदिक् प्रोक्तः कांदिशीको भयद्रुतः।
प्रस्कन्नः पतितो ज्ञेयो जितकाशी जिताहवः॥३२४॥
शुद्धांतमवरोधश्च राज्ञो अंतःपुरमुच्यते।

कृताभिषेका महिषी भोगिन्य इतराः स्मृताः ॥३२५॥

रामा वामा वामनेत्रा पुरंध्री
नारी भीरुर्भामिनी कामिनी च।
योषा योषिद्वासिता वर्णिनी स्त्री
स्यात्सीमंतिन्यंगना सुंदरी च ॥३२६॥

अबला महिला ललना प्रमदा रमणी नितंबिनी वनिता।
दयिता प्रतीपदर्शिन्युक्ता कान्ता वधूर्वशा युवतिः ॥३२७॥

कुमारी कथिता कन्या किंचित्प्रौढा सुवासिनी।
वर्या पतिंवरा प्रोक्ता नग्ना प्रोक्ता च कोटवी ॥३२८॥

अदृष्टरजसं नारीं नग्निकां ब्रुवते बुधाः।
वधूटी च चिरंटी च द्वितीयवयसौ स्त्रियौ ॥३२९॥

अर्धवृद्धा तु या नारी सा कात्यायनिका स्मृता।
पुनर्भूर्दिधिषूः प्रोक्ता वृषस्यंती रतार्थिनी ॥३३०॥

पतिवत्नी जीवत्पतिर्जीवतोका च जीवसूः।
रहिता पतिपुत्राभ्यां निर्वीरेत्यभिधीयते ॥३३१॥

विश्वस्ता विधवा प्रोक्ता पुष्पहीना च निष्कला।
श्रमणा भिक्षुकी मुंडा वयस्यालिः सखी स्मृता ॥३३२॥

अवीरुदक्या च रजस्वला स्यादात्रेयिका पुष्पवती च नारी।
राका भवेज्जातरजास्तु कन्या नष्टप्रसूतिः कथिता च
भिंडुः ॥३३३॥

मुख्या नारी वरारोहा वरस्त्री मत्तकाशिनी।
स्त्री विदग्धा च मत्ता च वाणिनीत्यभिधीयते ॥३३४॥
रूपाजीवा वेश्या गणिका पण्यांगना तथा क्षुद्रा।
राजकुलप्रतिबद्धा वारस्त्री वारमुख्या च ॥३३५॥
गाणिक्यं गणिकानां च समूहः कथ्यते बुधैः।
असिक्नयंतःपुरप्रेष्या दूती संचारिका स्मृता ॥३३६॥
कुट्टिनी शंभली चुंदी सैरंध्री गंधकारिका।
पोटा वोटा तथा चेटी दासी स्यात्कुटहारिका ॥३३७॥
पांचालिका पुत्रिका स्यात्काष्ठदंतादिनिर्मिता।
स्मृता लेप्यमयी स्त्री तु बुधैरंजलिकारिका ॥३३८॥
दाराः क्षेत्रं कलत्रं च भार्या सहचरी वधूः।
सधर्मचारिणी पत्नी जाया च गृहिणी गृहाः ॥३३९॥
उपयामः परिणयनं पाणिग्रहणं विवाह उद्वाहः।
कुलबालिका कुलस्त्री पतिव्रता सुचरिता सती साध्वी ॥३४०॥
पांशुला बंधुकी स्वैरिण्यसती पुंश्चलीत्वरी।
धर्षिणी कुलटा प्रोक्ता त्वविनीताभिसारिका ॥३४१॥
कांतः स्यात्कमिता पतिर्वरयिता भर्ता च भोक्ता धवो
रुच्याभीकवराभिकाश्च रमणः प्राणाधिनाथो ऽनुगः।
सूनुः संततिरात्मजश्च तनुजः पुत्रः प्रसूतिः सुत-
स्तुक् तोकं तनयश्च नंदन इति प्राज्ञैरपत्यं स्मृतं ॥३४२॥

आपन्नसत्त्वा गुर्वी स्यादंतर्वत्नी च गर्भिणी।
दोहदं दौर्हृदं श्रद्धा लालसा च समाः स्मृताः ॥३४३॥
सूतिमासो वैजननो गर्भो भ्रूण इति स्मृतः।
अरिष्टगृहमिच्छंति सूतिकाभवनं बुधाः ॥३४४॥
विजाता च प्रजाता च प्रसूता स्त्री निगद्यते।
गर्भाशयो जरायुः स्यादुल्वं च कललं स्मृतं ॥३४५॥
कन्यापुत्रस्तु कानीनो नाटेरः स्यान्नटीसुतः।
बंधुको बंधुकीपुत्रो गोप्यो दासीसुतः स्मृतः ॥३४६॥
बालः पाको ऽर्भको गर्भः पोतश्च पृथुकः शिशुः।
शावो डिंभश्च विज्ञेयो वटुर्माणवको मतः ॥३४७॥
प्रवयाः स्थविरो वृद्धो यातयामश्च कथ्यते।
जरा तु विस्रसा प्रोक्ता दारकस्तरुणो युवा ॥३४८॥
अंबा सवित्री जननी च माता वप्ता च तातो जनकः पिता च।
स्नुषा जनी पुत्रवधूर्वधूः स्यात्प्रजावती भ्रातृवधूः स्मृता च ॥३४९॥
दुहिता तनया पुत्री जामाता दुहितुःपतिः।
दौहित्रस्तत्सुतो नप्ता स च पौत्रश्च कथ्यते ॥३५०॥
अग्रजः पूर्वजो ज्येष्ठः कनिष्ठो ऽवरजो ऽनुजः।
भ्रातृव्यो भ्रातृपुत्रः स्यात् भ्रात्रीयो भ्रातृजस्तथा ॥३५१॥
धात्री स्यादुपमाता भगिनी जामिः स्वसा च विज्ञेया।

जामिः स्वसृकुलस्त्रियोः।

तत्पुत्रः स्वस्रीयो जामेयो भागिनेयः स्यात् ॥३५२॥
समानोदर्यसोदर्यसगर्भाः सोदराः समाः।
भ्रातृवर्गस्य या जाया यातरस्ताः परस्परं ॥३५३॥
आत्मीयः स्वजनो बंधुराप्तो ज्ञातिश्च बांधवः।
सनाभयः सपिंडाश्च सगोत्राश्च समाः स्मृताः ॥३५४॥
तनुस्तनूः संहननं शरीरं कलेवरं विग्रहदेहकायाः।
अंगं वपुर्वर्ष्म पुरं च पिंडं क्षेत्रं च गात्रं च घनश्च मूर्त्तिः ॥३५५॥
अड्. घ्रिः अंघ्रिः पादश्चरणः पाणिः शयपंचशाखकरहस्ताः।
कामांकुशाः कररुहाः पुनर्नवाः पाणिजा नखा नखराः ॥३५६॥
कांचीपदं कलत्रं जघनं श्रोणी ककुद्मती ज्ञेया। कलत्रं श्रोणिभार्ययोः।
आरोहश्च नितंबः कटी कटीरं त्रिकस्थानं ॥३५७॥
गुदः पायुरपानं स्यात्कटिप्रोथौ स्फिजौ पुतौ।
कुकुंदरौ समाचष्टे जनो जघनकूपकौ ॥३५८॥
भगो योनिरुपस्थश्च वरांगं स्मरमंदिरं।
शिश्नः शेफो ऽथ मेढ्रश्च तुल्ये मेहनशेफसी ॥३५९॥
जानुः स्यादष्ठीवान् प्रसृता जंघा च घुंडको गुल्फः।
ऊरुः सक्थि पिचंडं जठरोदरतुंदकुक्षिगर्भाः स्युः ॥३६०॥
अंगुल्यः करशाखाः कर्णः श्रोत्रं श्रुतिः श्रवः श्रवणं।
ग्रीवा धमनिर्मन्या शिरोधरा कंधरा गलः कंठः ॥३६१॥
रेखात्रयांकिता ग्रीवा कंबुग्रीवेति कथ्यते।

अवलग्नं विलग्नं च मध्यमं मध्यमुच्यते ॥३६२॥
मुंडोत्तमांगमस्तकमौलिशिरःशीर्षमूर्धकानि स्युः।
तुंडं वदनं वक्त्रं लपनं मुखमास्यमाननं च समं ॥३६३॥
दृग्दृष्टिनेत्रलोचनचक्षुर्नयनांबकेक्षणाक्षीणि।
अश्रूणि वाष्परोदननयनजलास्रुनामानि ॥३६४॥
नयनोपांतमपांगः कनीनिका नयनमध्यतारा च।
कूर्पं भ्रुवोश्च मध्यं सृक्क स्यादोष्ठपर्यंतः ॥३६५॥
सिंघिनी नासिका नासा घ्राणं घोणा च कथ्यते।
रसज्ञा रसना जिह्वा तालु काकुदमुच्यते ॥३६६॥
दोः प्रवेष्टो भुजो बाहुर्भुजा च स्मर्यते बुधैः।
गंडो गल्लः कपोलश्च हनुस्तुल्यार्थवाचकाः ॥३६७॥
मुष्को ऽंडं वृषणः कोशः संग्राह्यो मुष्टिरुच्यते।
जत्रु वक्षोंसयोः संधिरूरुसंधिश्च वंक्षणः ॥३६८॥
रोम तनूरुहमुक्तं नयनगतं पक्ष्म मुखगतं श्मश्रु।
अधरो दंतच्छद ओष्ठ उच्यते दंतवासश्च ॥३६९॥
ओष्ठस्याधश्चिबुकं ललाटमलिकं भुजाग्रमंसं च।
कक्षां च बाहुमूलं घाटामवटुं कृकाटिकामाहुः ॥३७०॥
उरसिजकुचवक्षोरुहपयोधराः स्तनसमाननामानि।
उक्ताः कुचमुखचूचुकवृंतानि शिखा च तुल्यानि ॥३७१॥
भुजमध्यमुरो वक्षो हृदयस्थानं च वत्समिच्छंति।

× अलकः पुमान् । अलकाश्चूर्णकुन्तला इत्यमरे दर्शनात् ।

एकार्थाः कथ्यंते दशनद्विजदंतरदरदनाः ॥३७२॥
क्रोडमंकस्तथोत्संगः प्राग्भागो वपुषः स्मृतः ।
पृष्ठं स्यात्पश्चिमो भागः कटौ च कटिशीर्षकौ ॥३७३॥
जीवस्थानं भवेन्मर्म पादाग्रं प्रपदं मतं ।
सीमंतः कथ्यते स्त्रीणां केशमध्ये तु पद्धतिः ॥३७४॥
केशाः शिरसिजमूर्धजकचचिकुरशिरोरुहाः स्मृता वालाः ।
तद्बंधविशेषाः स्युर्वेणीधम्मिल्लकुंतलकवर्यः ॥३७५॥
हस्तः पक्षः पाशः केशेषु बहुत्ववाचकाः शब्दाः । हस्तः पाशश्च पक्षश्च कलापार्थाः कचात् परे ।
× अलकं कुटिलाः केशा भ्रमरकमुक्तं ललाटस्थं ॥३७६॥
बालानां तु शिखा प्रोक्ता काकपक्षः शिखंडिका । शिखण्डक इति त्वमरे ।
पलितं पांडुराः केशा व्रतिनां तु जटा सटा ॥३७७॥
मणिबंधः पाणिमूलं कफणिः कूर्परः स्मृतः । कफोणिः कफणिर्द्वयो इति शब्दार्णवः ।
तयोर्मध्यं प्रकोष्ठः स्यात्प्रकांडः कूर्परांसयोः ॥३७८॥
चेतश्चित्तं मनः स्वांतं हृदयं मानसं समं ।
एकायनं तथैकाग्रमेकतानं च तद्गतं ॥३७९॥
आधिस्तु मानसी पीडा वांछितो ऽर्थो मनोरथः ।
खमक्षामिंद्रियं स्रोतो हृषीकं करणं स्मृतं ॥३८०॥
मध्यांगुलीकूर्परयोर्मध्ये प्रामाणिकः करः ।
बद्धमुष्टिकरो रत्निररत्निः सकनिष्ठिकः ॥३८१॥
संपिंडितांगुलिर्मुष्टिः प्रसृतिः कुंचितांगुलिः ।

प्रसारितांगुलिः पाणिः कथ्यते प्रतलस्तलः ॥३८२॥
प्रादेशः स्यात्प्रदेशिन्या तालो मध्यमया भवेत्।
गोकर्णो ऽनामया प्रोक्तो वितस्तिः स्यात्कनिष्ठया ॥३८३॥
आकल्पो मंडनं वेषः प्रतिकर्म प्रसाधनं।
भूषणं स्यादलंकारो नेपथ्याभरणे तथा ॥३८४॥
समालभनमिच्छंति चर्चां मार्ष्टिं च सूरयः।
स्थासकं हस्तबिंबं स्यात्परिष्कारश्च भूषणं ॥३८५॥
तिलकं तमालपत्रं चित्रकमुक्तं विशेषकः पुंड्रं।
रचिता ललाटपट्टे ललाटिका कथ्यते रेखा ॥३८६॥
भुजशिखरस्तनमंडलकपोलकंठेषु विरचिता कुशलैः।
अनुलेपनेन लेखा निगद्यते पत्रवल्लीति ॥३८७॥
कुंकुमं घुसृणं वर्णं प्रोक्तं लोहितचंदनं।
काश्मीरजं च विद्वद्भिः कालेयं नागुडं स्मृतं ॥३८८॥
चंदनं स्यान्मलयजं श्रीखंडं रोहणद्रुमः।
मृगनाभिर्मृगमदः प्रोक्ता कस्तूरिका बुधैः ॥३८९॥
कर्पूरो घनसारः स्यात्काकतुंडो ऽगरुः स्मृतः।
तांबूलं क्रमुकं प्रोक्तमंगरागो विलेपनं ॥३९०॥
उपसंव्यानं परिधानमंतरीयं च निवसनं तुल्यं।
प्रावरणं संव्यानं प्रच्छादनमुत्तरीयं च ॥३९१॥
अर्धोरुकं वरस्त्रीणां वासश्चंडातकं स्मृतं।

परिधानांशुकग्रंथिः प्रोक्ता नीवी तथोच्चयः ॥३९२॥
चेलं चीरं वासः कर्पटमाच्छादनं निवसनं च ।
अंबरमंशुकमुक्तं वस्त्रं सिचयः पटः पोटः ॥३९३॥
चतुर्विधं तु विज्ञेयं त्वक्सूत्रकृमिरोमजं ।
पत्त्रोर्णं धौतकौशेयं दुकूलं क्षौममिष्यते ॥३९४॥
कार्पासं बादरं प्रोक्तं वस्त्रस्यांतो मतो ऽंचलः ।
अहतं स्यान्नवं वासो जीर्णमुक्तं पटच्चरं ॥३९५॥
धौतमुद्गमनीयं च वर्तिर्वस्तिर्दशाः सिचः ।
एकार्था आविकौरअरल्लकोर्णायुकंबलाः ॥३९६॥
कंचुको वारवाणः स्यात्कूर्पासश्च निचोलकः ।
स्रग्माला माल्यमाख्यातं केशमध्ये तु गर्भकः ॥३९७॥
प्रभ्रष्टकं शिखालंबि पुरो न्यस्तं ललामकं ।
तिर्यग्वक्षसि विक्षिप्तं वैकक्षकमुदाहृतं ।
ग्रीवायां लंबितं प्राज्ञैः प्रालंबकमिति स्मृतं ॥३९८॥
आपीडः शेखरोत्तंसावतंसाः शिरसि स्रजः ।
कर्णपूरे ऽपि दृश्येते तथोत्तंसावतंसकौ ॥३९९॥
जतुयावकलाक्षालक्तकाः समाः सिक्थकं मधूच्छिष्टं ।
कज्जलमंजनमभिहितमादर्शो दर्पणो मुकुरः ॥४००॥
ताडंकस्ताडपत्त्रं स्यात्कुंडलं कर्णवेष्टनं ।
कर्णालंकरणं सर्वं कर्णिकेत्यभिधीयते ॥४०१॥

प्रहस्त इत्यपि

प्रसारितांगुलिः पाणिः कथ्यते प्रतलस्तलः ॥३८२॥
प्रादेशः स्यात्प्रदेशिन्या तालो मध्यमया भवेत्।
गोकर्णो ऽनामया प्रोक्तो वितस्तिः स्यात्कनिष्ठया ॥३८३॥
आकल्पो मंडनं वेषः प्रतिकर्म प्रसाधनं।
भूषणं स्यादलंकारो नेपथ्याभरणे तथा ॥३८४॥
समालम्भनम् समालभनमिच्छंति चर्चां मार्ष्टिं च सूरयः।
स्थासकं हस्तबिंबं स्यात्परिष्कारश्च भूषणं ॥३८५॥
तिलकं तमालपत्रं चित्रकमुक्तं विशेषकः पुंड्रं।
रचिता ललाटपट्टे ललाटिका कथ्यते रेखा ॥३८६॥
भुजशिखरस्तनमंडलकपोलकंठेषु विरचिता कुशलैः।
अनुलेपनेन लेखा निगद्यते पत्रवल्लीति ॥३८७॥
कुंकुमं घुसृणं वर्णं प्रोक्तं लोहितचंदनं।
काश्मीरजं च विद्वद्भिः कालेयं जागुडं स्मृतं ॥३८८॥
चंदनं स्यान्मलयजं श्रीखंडं रोहणद्रुमः।
मृगनाभिर्मृगमदः प्रोक्ता कस्तूरिका बुधैः ॥३८९॥
कर्पूरो घनसारः स्यात्काकतुंडो ऽगरुः स्मृतः।
तांबूलं क्रमुकं प्रोक्तमंगरागो विलेपनं ॥३९०॥
उपसंव्यानं परिधानमंतरीयं च निवसनं तुल्यं।
प्रावरणं संव्यानं प्रच्छादनमुत्तरीयं च ॥३९१॥
अर्धोरुकं वरस्त्रीणां वासश्चंडातकं स्मृतं।

परिधानांशुकग्रंथिः प्रोक्ता नीवी तथोच्चयः ॥३९२॥
चेलं चीरं वासः कर्पटमाच्छादनं निवसनं च।
अंबरमंशुकमुक्तं वस्त्रं सिचयः पटः पोटः ॥३९३॥
चतुर्विधं तु विज्ञेयं त्वक्सूत्रकृमिरोमजं।
पत्त्रोर्णं धौतकौशेयं दुकूलं क्षौममिष्यते ॥३९४॥
कार्पासं बादरं प्रोक्तं वस्त्रस्यांतो मतो ऽंचलः।
अहतं स्यान्नवं वासो जीर्णमुक्तं पटच्चरं ॥३९५॥
धौतमुद्गमनीयं च वर्तिर्वस्तिर्दशाः सिचः।
एकार्था आविकौरभ्रल्लकोर्णायुकंबलाः ॥३९६॥
कंचुको वारवाणः स्यात्कूर्पासश्च निचोलकः।
स्रग्माला माल्यमाख्यातं केशमध्ये तु गर्भकः ॥३९७॥
प्रभ्रष्टकं शिखालंबि पुरो न्यस्तं ललामकं।
तिर्यग्वक्षसि विक्षिप्तं वैकक्षकमुदाहृतं।
ग्रीवायां लंबितं प्राज्ञैः प्रालंबकमिति स्मृतं ॥३९८॥
आपीडः शेखरोत्तंसावतंसाः शिरसि स्रजः।
कर्णपूरे ऽपि दृश्येते तथोत्तंसावतंसकौ ॥३९९॥
जतुयावकलाक्षालक्तकाः समाः सिक्थकं मधूच्छिष्टं।
कज्जलमंजनमभिहितमादर्शो दर्पणो मुकुरः ॥४००॥
ताडंकस्ताडपत्त्रं स्यात्कुंडलं कर्णवेष्टनं।
कर्णालंकरणं सर्वं कर्णिकेत्यभिधीयते ॥४०१॥

केयूरमंगदं प्रोक्तं बाहुमूलविभूषणं।
आवापः परिहार्यः स्यात्कटको वलयं तथा ॥४०२॥
कंकणं हस्तसूत्रं च विदुः प्रतिसरं बुधाः।
ग्रीवालंकरणं सर्वं ग्रैवेयकमितीष्यते ॥४०३॥
अंगुल्याभरणं प्रोक्तमंगुलीयकमूर्मिका।
कथ्यते ऽंगुलिमुद्रा च भवेद्या लिखिताक्षरा ॥४०४॥
कलापः सप्तकी कांची मेखला रसना तथा।
कटिसूत्रं सारसनं किंकिणी क्षुद्रघंटिका ॥४०५॥
सिंजिनी पादकटकस्तुलाकोटिस्तु नूपुरं।
मंजीरं हंसकं स्त्रीणां चरणाभरणं स्मृतं ॥४०६॥
देवच्छंदः ""तयष्टिरर्धो माणवकः स्मृतः।
हारो गुच्छार्धगुच्छौ च गोपुच्छश्च भवेत्क्रमात् ॥४०७॥
एकावल्येकयष्टिः स्यात्कथ्यते सा च कंठिका।
प्रोक्ता नक्षत्रमाला च सप्तविंशतिमौक्तिका ॥४०८॥
हारामध्यस्थितं रत्नं नायकं तरलं विदुः।
चूडामणिं च विद्वांसो वदंति शिरसि स्थितं ॥४०९॥
आकुः किरीटमुष्णीषं कोटीरं मुकुटं समं।
राढा शोभा विभूषा स्यादभिख्या सुषमा समाः ॥४१०॥
निभालनं निशामनं निध्यानमवलोकनं।
ईक्षणं दर्शनं दृष्टिर्द्योतनं च समं स्मृतं ॥४११ ॥

कटाक्षो दृष्टिविक्षेप ईषच्च हसितं स्मितं ।
ह्रीर्लज्जापत्रपा व्रीडा त्रपा मंदाक्षमुच्यते ॥४१२॥
आलिंगनमुपगूहनमाङ्कः परिरंभणं परिष्वंगं ।
आश्लेषमंकपालीं क्रोडीकरणं च तुल्यार्थं ॥४१३॥
संवेशनं निधुवनं संप्रयोगो रहो रतिः ।
सुरतं मोहनं प्रोक्तं मणितं रतकूजितं ॥४१४॥
आर्या भूमिस्पृशो वैश्या ऊरव्याश्च विशः स्मृताः ।
जीवनं वृत्तिराजीवो वार्त्ता चेति निगद्यते ॥४१५॥
पण्याजीवा वणिजः प्रापणिका नैगमाश्च वैदेहाः ।
द्वैगुणिको वार्धुषिको वृद्ध्याजीवः कुसीदिकः प्रोक्तः ॥४१६॥
अपमित्यकमुद्धार ऋणं स्यात्पर्युदंचनं ।
वृद्धिः कलांतरं प्रोक्तं कुसीदं वृद्धिजीवनं ॥४१७॥
परिवृत्तिर्विनिमयो वैमेयश्च निगद्यते ।
प्रक्रयः क्लप्तिकं प्रोक्तं भाटको ऽवक्रयः स्मृतः ॥४१८॥
क्षेत्राजीवः कृषिकः कृषीवलः कर्षकः कुटुंबी च ।
सीत्यं सस्यं प्रोक्तं वप्रं क्षेत्रं च केदारं ॥४१९॥
हलं स्याल्लांगलं सीरः फालः कुशिक उच्यते ।
योक्त्रं तु रश्मिराबंधः शम्या च युगकीलकः ॥४२०॥
कथितो लोष्टको लोष्टः कोटीशं लोष्टभेदनं ।
शंबाकृतं द्विसीत्यं स्यात्सीता लांगलपद्धतिः ॥४२१॥

गोदारणं च कुद्दालं लवित्रं दात्रमुच्यते।
प्रतोदः प्राजनं तोत्त्रं लूनं दातमिति स्मृतं ॥४२२॥
खलेवाली भवेन्मेठिः खलधान्यं खलं स्मृतं।
बुशः कडंगरः प्रोक्तः कणः स्यात्क्षुद्रतंडुलः ॥४२३॥
धान्यशूकं च किंशारुः कणिशं धान्यशीर्षकं।
नालं कांडं क्षुपो गुच्छो व्रीह्निः स्तंबकरिः स्मृतः ॥४२४॥
रक्तशालिर्महाशालिः कलमाश्चेति शालयः।
उद्दालः कथितः प्राज्ञैः कोद्रवः कोरदूषकः ॥४२५॥
मंगल्यको मसूरः स्यात्सिद्धार्थः सर्षपः स्मृतः।
आसुरी राजिका चेति कथ्यते राजसर्षपः ॥४२६॥
प्रियंगुः कथ्यते कंगुरतसी स्यादुमा क्षुमा।
कलायः खंडिको ज्ञेयः सातीनश्च मनीषिभिः ॥४२७॥
जर्तिलः कथ्यते सद्भिररण्यप्रभवस्तिलः।
तिलपिंजस्तिलपेजस्तथा षंढतिलः स्मृतः ॥४२८॥
तृणधान्यं तु नीवारः श्यामाकः श्यामको भवेत्।
वल्ला निष्पावकाः प्रोक्ता आढकी तुवरी स्मृता ॥४२९॥
भृष्टं धान्यं लाजाः पृथुकाश्चिपिटाश्च कुट्टितास्ते स्युः।
भृष्टा यवास्तु धाना दरपक्का कथ्यते ऽभ्यूषः ॥४३०॥
शूद्रो ऽंत्यवर्णो वृषलः पद्यः पज्जश्च कथ्यते।
लेखकः स्याल्लिपिकरः कायस्थो ऽक्षरजीवकः ॥४३१॥

आभीरः स्यान्महाशूद्रो गोपालो वल्लवस्तथा ।
त्वष्टा च काष्ठतट् तक्षा रथकारश्च वर्धकिः ॥४३२॥
नाडिंधमः कलादः सुवर्णकारश्च मुष्टिको ज्ञेयः ।
वैकटिको मणिकारो ध्माकारो लोहकारः स्यात् ॥४३३॥
क्षुरमर्दी दिवाकीर्तिश्चंडिलो नापितः स्मृतः ।
मालाकारस्तु विज्ञेयो मालिकः प्रातिहारिकः ॥४३४॥
कुंभकारः कुलालः स्यात्तंतुवायः कुविंदकः ।
संवाहको ऽंगमर्दी स्यात्तुन्नवायश्च सौचिकः ॥४३५॥
लेपकः पलगंडः स्याद्रंगाजीवस्तु चित्रकृत् ।
कर्म लेप्यादिकं सर्वं पुस्तकर्म स्मृतं बुधैः ॥४३६॥
शैलाली शैलूषः कुशीलवश्चारणः कृशाश्वी च ।
जायाजीवो भरतो नटस्तथा स्यान्नटी क्षुद्रा ॥४३७॥
शिल्पिनः कारवः प्रोक्ताः प्रकृतिश्च मनीषिभिः ।
निर्णेजकः स्याद्रजकः कल्पपालस्तु शौंडिकः ॥४३८॥
कैवर्तो धीवरो दासो मत्स्यबंधी च जालिकः ।
आनायः कथ्यते जालं कुवेणी मत्स्यबंधनी ॥४३९॥
वैतंसिकः सौनिकः स्यात्कौटिको मांसविक्रयी ।
सूना स्याद्घातनस्थानं कृपाणीलि च कर्तरी ॥४४०॥
चर्मकृत्पादुकाकारो नद्ध्री वद्ध्री च कथ्यते ।
मृगयुर्लुब्धको व्याधो बुधैर्वागुरिकः स्मृतः ॥४४१॥

शुल्वा रज्जुर्वराटश्च वटस्तंत्रीर्गुणः स्मृतः।
पाशः स्याद्बंधनग्रंथिर्वागुरा मृगजालिका ॥४४२॥
अंतावसायी चंडालो निषादश्च जनंगमः।
श्वपचः पक्कशश्चैव मातंगः प्लवकः स्मृतः॥४४३॥
किराताः शबरा निष्ठ्याः पुलिंदा नाहला भटाः।
माला म्लेच्छादयो भिल्लाः कथ्यंते ह्यंतजातयः॥४४४॥
रोगो रुक् व्याधिराकल्यं गदो मांद्यमपाटवं।
आम आमय आतंक उपतापो रुजा स्मृता॥४४५॥
क्षवथुः कथ्यते कासो वेपथुः कंप उच्यते।
दवथुः परितापः स्यात् ग्लानिंश्च क्लमथुः स्मृतः॥४४६॥
राजयक्ष्मा क्षयः शोषः शोफः श्वयथुरिष्यते।
किलासं कथ्यते सिध्म पामा कच्छूः खसः स्मृतः॥४४७॥
कंडूतिः कंडूया कंडूः कंडूयनं तथा खर्जूः।
जागर्या जागरणं प्रजागरो जागरा च विज्ञेया॥४४८॥
पिटकः स्फोटको गंडः श्वित्रं कुष्ठं च पांडुरं।
श्लीपदं पादवल्मीकः पृष्ठग्रंथिर्गडुः स्मृतः॥४४९॥
केशघ्नमिंद्रलुप्तं स्यादर्शश्च गुदकीलकः।
मायुः पित्तः कफः श्लेष्मा प्रतिश्यायश्च पीनसः॥४५०॥
वातकी वातरोगी स्यात्सातिसारो ऽतिसारकी।
सिध्मश्लेष्मार्शसंयोगात्सिध्मलः श्लेष्मलो ऽर्शसः॥४५१॥

दद्रुणो दद्रुरोगी स्यान्नःक्षुद्रः क्षुद्रनासिकः।
क्लिन्ने यस्याक्षिणी पिल्लश्चिल्लश्चुल्लश्च स स्मृतः॥४५२॥
पिचंडिलो बृहत्कुक्षिस्तुंदिलोदरिलौ च सः।
खलतिः शिपिविष्टः स्यादिंद्रलुप्तिक एव च॥४५३॥
अंधो ह्यनेडमूकः स्यादेडो बधिर उच्यते।
जडः कडः स्मृतो मूकः कल्लमूकस्त्ववाक्श्रुतिः॥४५४॥
खंजः पंगुस्तथा श्रोणः कुणिर्विकलपाणिकः।
तुंडिरुन्नतनाभिः स्याद्विग्रो विगतनासिकः॥४५५॥
गडुलः कथ्यते कुब्जः खर्वशाखस्तु वामनः।
पृश्निः स्वल्पशरीरः स्यात्किरातः स च कथ्यते॥४५६॥
आयुर्वेदी भिषग्वैद्यो दोषज्ञः स्याच्चिकित्सकः।
उपचर्या चिकित्सा स्यान्निदानं हेतुरुच्यते॥४५७॥
जांगुलिको विषभिषक् व्यालग्राह्याहितुंडिकः।
भैषज्यं भेषजं जायुरगदस्तंत्रमौषधं॥४५८॥
सिंधूत्थं माणिमंथं च सैंधवं लवणोत्तमं।
कृष्णोपकुल्या वैदेही मागधी पिप्पली कणा॥४५९॥
शुंठी नागरमुक्ता महौषधं विश्वभेषजं विश्वा।
मधुकं यष्टिमधु स्यादमृता वत्सादनी गुडूची च॥४६०॥
आर्द्रकं शृंगवेरं स्यादजाजी जीरकः स्मृतः।
वेल्लजं मरिचं प्रोक्तमूषणं च मनीषिभिः॥४६१॥

सौवर्चलस्तु रुचकः कुस्तुंबुरु च धान्यकं।
त्रिकटु त्र्यूषणं व्योषं हिंगु रामठ उच्यते ॥४६२॥
हरीतक्यभया पथ्या धात्री चामलकी शिवा।
कलिरक्षो विभीतः स्यात् त्रितयं त्रिफला स्मृता ॥४६३॥
एडगजः प्रपुनाटो दद्रुघ्नश्चक्रमर्दकः प्रोक्तः।
शतमूलिका त्वभीरुर्निदिग्धिका कंटकारिका व्याघ्री ॥४६४॥
पुराख्यो महिषाक्षश्च गुग्गुलः स्यात्पलंकषः।
महारजनमिच्छंति कुसुंभं च सुमेधसः ॥४६५॥
हिंगुलं हंसपादं च कुरुविंदं निगद्यते।
सारघं माक्षिकं क्षौद्रं मधु पुष्परसस्तथा ॥४६६॥
उशीरं वीरणीमूलं ह्रीवेरं वालकं जलं।
मुस्तकः कुरुविंदः स्याद्गुंद्रा च जलदाह्वयः ॥४६७॥

॥ इति श्रीभट्टहलायुधकृतायामभिधानरत्नमालायां
भूमिकांडं द्वितीयं समाप्तं ॥

वडवामुखं पातालं वैरोचननिकेतनं।
तथाधोभुवनं प्रोक्तं नागलोको रसातलं ॥१॥
निम्नमगाधो गर्तः श्वभ्रं शुषिरं त्रपा बिलं विवरं।
श्वंतरमवटु छिद्रं निर्व्यथनं रंध्ररोककुहरदराः ॥२॥

निरयो दुर्गतिश्चैव नरकः परिकीर्तितः।
नारका जंतवः प्रेता यात्याश्चैवातिवाहिकाः ॥३॥
यातना कारणा प्रोक्ता कारा बंधनमुच्यते।
आबाधा वेदना दुःखमार्त्तिः पीडा व्यथा तथा ॥४॥
वृजिनं दुरितं दुष्कृतमघमंहः किल्बिषं तमः कल्कं।
एनः कल्मषमशुभं पापं स्यात्पातकं पाप्मा ॥५॥
निधनं नाशो मृत्युर्मरणं पंचत्वमत्ययः कालः।
संस्था स्याद्दिष्टांतो निमीलनं दीर्घनिद्रा च ॥६॥
परासुरुपसंपन्नः प्रमीतः संस्थितो मृतः।
प्रेतः परेतश्च तथा कुणपः शवमुच्यते ॥७॥
कबंधः कथ्यते रुंडः क्षतमीर्ममरुर्व्रणः।
असृग्धराजिनं चर्म कृत्तिस्त्वक् परिकीर्तिता ॥८॥
पललं जांगलं मांसं पलं पिशितमामिषं।
क्रव्यं तरसमेकार्थं विस्रं स्यादामगंधिकं ॥९॥
क्षतजं लोहितमस्रं रुधिरमसृक् शोणितं च रक्तं स्यात्।
अस्थीनि धातुकीकसकुल्यानि भवंति तुल्यानि ॥१०॥
शरीरस्यास्थि कंकालं तथा स्यादस्थिपंजरं।
शिरसोऽस्थि करोटिः स्यात्कपालं शकलं च तत् ॥११॥
शाखास्थि नलकं प्रोक्तं पृष्ठस्यास्थि कसेरु च।
कंडरा स्यान्महास्नायुः स्नसा स्नायुः शिरा स्मृता ॥१२॥

मस्तिष्कं मस्तकस्नेहो वपा मेदो वसा स्मृता।
अंत्रं पुरीतत्कथितं कालखंडं यकृन्मतं ॥१३॥
बुक्कं स्याद्यमांसं च तिलकं क्लोम कथ्यते।
कृमिः कीटस्तु नीलंगुः पुलकश्च समः स्मृतः ॥१४॥
उच्यते वर्च उच्चारो वर्चस्को ऽवस्करः शकृत्।
गूथं कीटं च विट् विष्ठा पुरीषं शमलं मलं ॥१५॥
शुक्रं वीर्यं बलं बीजमिंद्रियं रेत उच्यते।
श्मशानं स्यात्पितृवनं चिता चित्या च कथ्यते ॥१६॥
क्रंदितं रुदितं प्रोक्तं विलापः परिदेवनं।
अपस्नानं मृतस्नानं निवापः पितृतर्पणं ॥१७॥
विषधरदंदशूकपवनाशनसर्पसरीसृपोरुगव्याल-
भुजगभुजंगकुंभीनसपन्नगनागभोगिनः।
अहिफणभृत्पृदाकुकाकोदरकंचुकिचक्रिगूढपा-
त् द्विरसनकाद्रवेयदर्वीकाद्दकृश्रुतयो भुजंगमाः ॥१८॥
आशीविषो दीर्घपृष्ठः कुंडली जिह्मगः स्मृतः।
फणः फणा फटा प्रोक्ता विषं स्याद्गरलं गरः ॥१९॥
अहेः शरीरं भोगः स्यादाशीर्दंष्ट्राभिधीयते।
भवेत्तिलित्सो गोनासो वाहसो ऽजगरः शयुः ॥२०॥
अलगर्दो जलव्यालो राजिलो डुंडुभः स्मृतः।
अहीरणी स्यात् द्विमुखो राजसर्पश्च सर्पभुक् ॥२१॥

निर्ल्वयनी निर्मोकः कंचुकस्तन्त्रा भुजंगमुक्ता त्वक् ।
वम्रीकूटं नाकुर्वल्मीको वामलूरश्च ॥२२॥
उपजिह्वोपदीका च वम्री स्याडुपदेहिका ।
अलं वृश्चिकलांगूलं द्रुत आलिश्च वृश्चिकः ॥२३॥
ब्रह्मपुत्रः शौल्किकेयो दारदश्च प्रदीपनः ।
रसः सौराष्ट्रिकः द्वेडस्तीक्ष्णाश्च विषमुच्यते ॥२४॥
शृंगिको वत्सनाभश्च कालकूटो हलाहलः ।
काकोलो विस्फुलिंगश्च तद्भेदाः स्युरनेकधा ॥२५॥
आपस्तोयं घनरसपयः पुष्करं मेघपुष्पं
कं पानीयं सलिलमुदकं वारि वाः शंबरं च ।
अर्णः पाथः कुशजलवनं क्षीरमंभो ऽंबु नीरं
प्रोक्तं प्राज्ञैर्भुवनमंमृतं जीवनीयं दकं च ॥२६॥
अतलस्पर्शमगाधं गंभीरं स्याद्गभीरमस्थागं ।
नावा तार्यं नाव्यं द्रागभृतकं तत्क्षणोद्धृतं तोयं ॥२७॥
प्रालेयमवश्यायस्तुहिनं शिशिरं हिमं तुषारं च ।
मिहिका स्यान्नीहारो हिमसंघातो हिमानी च ॥२८॥
रोमांचः पुलकः स्यात्कंटकमुद्गुषणमुल्लकसनं च ।
रोमोद्गमरोमविकाररोमहर्षाः समानार्थाः ॥२९॥
रत्नाकरः सरस्वानुदधिरुदन्वान्सरित्पतिरकूपारः ।
पारावारस्तोयनिधिरर्णवजलराशिसागरसमुद्राः ॥३०॥

मस्तिष्कं मस्तकस्नेहो वपा मेदो वसा स्मृता।
अंत्रं पुरीतत्कथितं कालखंडं यकृन्मतं ॥१३॥
बुक्कं स्यादग्रमांसं च तिलकं क्लोम कथ्यते।
कृमिः कीटस्तु नीलंगुः पुलकश्च समः स्मृतः ॥१४॥
उच्यते वर्च उच्चारो वर्चस्को ऽवस्करः शकृत्।
गूथं कीटं च विट् विष्ठा पुरीषं शमलं मलं ॥१५॥
शुक्रं वीर्यं बलं बीजमिंद्रियं रेत उच्यते।
श्मशानं स्यात्पितृवनं चिता चित्या च कथ्यते ॥१६॥
क्रंदितं रुदितं प्रोक्तं विलापः परिदेवनं।
अपस्नानं मृतस्नानं निवापः पितृतर्पणं ॥१७॥
विषधरदंदशूकपवनाशनसर्पसरीसृपोरुगव्याल-
भुजगभुजंगकुंभीनसपन्नगनागभोगिनः।
अहिफणभृत्पृदाकुकाकोदरकंचुकिचक्रिगूढपा-
त् द्विरसनकाद्रवेयदर्वीकादृक्श्रुतयो भुजंगमाः ॥१८॥
आशीविषो दीर्घपृष्ठः कुंडली जिह्मगः स्मृतः।
फणः फणा फटा प्रोक्ता विषं स्याद्गरलं गरः ॥१९॥
अहेः शरीरं भोगः स्यादाशीर्दंष्ट्राभिधीयते।
भवेत्तिलित्सो गोनासो वाहसो ऽजगरः शयुः ॥२०॥
अलगर्दो जलव्यालो राजिलो डुंडुभः स्मृतः।
अहीरणी स्यात् द्विमुखो राजसर्पश्च सर्पभुक् ॥२१॥

निल्र्वयनी निर्मोकः कंचुक उक्ता भुजंगमुक्ता त्वक्।
वम्रीकूटं नाकुर्वल्मीको वामलूरश्च ॥२२॥
उपजिह्वोपदीका च वम्री स्यादुपदेहिका।
अलं वृश्चिकलांगूलं द्रुत आलिश्च वृश्चिकः ॥२३॥
ब्रह्मपुत्रः शौल्किकेयो दारदश्च प्रदीपनः।
रसः सौराष्ट्रिकः क्ष्वेडस्तीक्ष्णश्च विषमुच्यते ॥२४॥
शृंगिको वत्सनाभश्च कालकूटो हलाहलः।
काकोलो विस्फुलिंगश्च तद्भेदाः स्युरनेकधा ॥२५॥
आपस्तोयं घनरसपयः पुष्करं मेघपुष्पं
  कं पानीयं सलिलमुदकं वारि वाः शंबरं च।
अर्णः पाथः कुशजलवनं क्षीरमंभो ऽंबु नीरं
  प्रोक्तं प्राज्ञैर्भुवनममृतं जीवनीयं दकं च ॥२६॥
अतलस्पर्शमगाधं गंभीरं स्याद्गभीरमस्थागं।
नावा तार्यं नाव्यं द्राग्भृतकं तत्क्षणोद्धृतं तोयं ॥२७॥
प्रालेयमवश्यायस्तुहिनं शिशिरं हिमं तुषारं च।
मिहिका स्यान्नीहारो हिमसंघातो हिमानी च ॥२८॥
रोमांचः पुलकः स्यात्कंटकमुद्धुषणमुल्लकसनं च।
रोमोद्गमरोमविकाररोमहर्षाः समानार्थाः ॥२९॥
रत्नाकरः सरस्वानुदधिरुदन्वान्सरित्पतिरकूपारः।
पारावारस्तोयनिधिरर्णवजलराशिसागरसमुद्राः ॥३०॥

वीची भंगस्तरंगः स्यात्तन्महत्त्वे च कथ्यते ॥
ऊर्मिरुत्कलिकोल्लोलः कल्लोलो लहरी तथा ॥३१॥
मर्यादा कूलदेशो ऽस्य वेला वृद्धिश्च वारिणः ।
वेलावनं तु विज्ञेयमुपकंठे ऽस्य यद्वनं ॥३२॥
सांयात्रिकः पोतवणिक् पोतः प्रवहणं स्मृतं ।
कूपको गुणवृक्षः स्यान्निर्यामः कर्णधारकः ॥३३॥
अंतर्जलचरं सत्त्वं क्रूरं यादो ऽभिधीयते ।
अवहारः स्मृतो ग्राहः कुंभीरो नक्र उच्यते ।
कच्छपः कमठः कूर्मस्तद्भार्या च डुली स्मृता ॥३४॥
वैसारिणो विसारः पृथुरोमा जलचरो झषो मत्स्यः ।
तिमिरनिमिषश्च मीनः शकली शल्की च विज्ञेयः ॥३५॥
सहस्रदंष्ट्रः पाठीनः प्रोष्ठी च शफरी स्मृता ।
नलमीनश्चिलिचिमः कुलीरः कर्कटो मतः ॥३६॥
शालः शकुलः कुलिशो राजीवो रोहितश्च पल्लवकः ।
शृंगीमद्गुरवागुसनंद्यावर्ताद्यो महामत्स्याः ॥३७॥
मत्स्यविशेषो मकरः करिमकरो भवति तद्विशेषस्तु ।
चीरिल्लितिमितिमिंगिलगिलादयो महामत्स्याः ॥३८॥
क्षुद्रांडो मत्स्यसंघातः पोताधानं च कथ्यते ।
गंडूपदः किंचुलको जलौकाः स्युर्जलौकसः ॥३९॥
मंडूकः प्लवको भेकः शालूरो दर्दुरो हरिः ।

प्लवंगमः प्लवगः स्याद्दर्षाभूस्तद्वधूः स्मृता ॥४०॥
यावंतो दृश्यंते नरकरितुरगादयः स्थले जीवाः।
तावंतः सलिलेष्वपि जलपूर्वास्ते तु विज्ञेयाः ॥४१॥
उक्ता मुक्ता मौक्तिकं शौक्तिकेयं
मुक्तास्फोटः शुक्तिराख्यायते च।
कंबुः शंखः क्षुल्लकाः क्षुद्रशंखाः
शंबूकास्ते स्युः कपर्दो वराटः। ४२॥
सिंधुः स्रवंती तटिनी तरंगिणी
नदी धुनी निर्झरिणी च निम्नगा।
कूलंकषा शैवलिनी सरस्वती
समुद्रकांता ह्रदिनी तथापगा ॥४३॥
स्रोतः स्रोतस्विनी कर्षूः कुल्या द्वीपवती सरित्।
रोधोवप्रस्तु विज्ञेयो भिद्य उद्यो नदः स्मृतः ॥४४॥
तीरं कूलं तटं कच्छः प्रपातो रोध उच्यते।
अर्वाक्कूलमपारं स्यात्परं पारमिति स्मृतं ॥४५॥
पात्रं तु कूलयोर्मध्यमावर्तः पयसां भ्रमः।
पूरः स्यादंभसो वृद्धिः फेनो डिंडीर उच्यते ॥४६॥
ओघः प्रवाहो वेणी च धारा स्रोतो रयः स्मृतः।
संभेदः संगमो नद्योः संवेद्यश्च निगद्यते ॥४७॥
सैकतं पुलिनं द्वीपं सिकता वालुका स्मृता।

मध्ये द्वीपमंतरीपं ह्रदस्तोयाशयो मतः ॥४८॥
चक्राणि पुटभेदाः स्युः सेतुर्वरण उच्यते ।
आतरस्तरपण्यं च तल्पं स्यादुडुपः प्लवः ॥४९॥
तरीनौर्भंगिनी बेडा नौदंडः क्षेपणी स्मृता ।
अरित्रं कोटिपात्रं स्यात्पुलिंदो मंग उच्यते ॥५०॥
भागीरथी सुरसरिद्विष्णुपदी जाह्नवी तथा गंगा ।
मंदाकिनी त्रिपथगा सरिद्वरा त्रिदशदीर्घिका प्रोक्ता ॥५१॥
गोदावरी च गोदा कालिंदी दिनकरात्मजा यमुना ।
शोणो हिरण्यबाहुर्मेकलकन्या च नर्मदा रेवा ॥५२॥
वेशंतः पल्वलं तल्लं कासारः सरसी सरः ।
आखातो देवखातः स्यात्खाता पुष्करिणी भवेत् ॥५३॥
आधारश्च तडागं स्यादाली पाली च कथ्यते ।
परिखा दीर्घिका प्रोक्ता खाता या परितः पुरं ॥५४॥
परीवाहो जलोच्छ्वास उत्सः प्रस्रवणं स्मृतं ।
विप्रुषो विंदवः प्रोक्ताः पृषतः पृषतास्तथा ॥५५॥
पिच्छिलं स्याद्विजपिलं पंकः शादो निषद्वरः ।
जंबालः कर्दमः प्रोक्तो बुधैरिचिक्किलस्तथा ॥५६॥
सहस्रपत्त्रं शतपत्त्रमंबुजं कुशेशयं तामरसं सरोरुहं ।
विसप्रसूनं कमलं महोत्पलं सरोजमब्जं नलिनं च पुष्करं ॥५७॥
राजीवमरविंदं च पद्मं पंकजमिष्यते ।

रक्तं कोकनदं प्रोक्तं पुंडरीकं सितांबुजं ॥५८॥
सौगंधिकं च कह्लारं स्यादिंदीवरमुत्पलं ।
नीलोत्पलं कुवलयं कैरवं कुमुदं विदुः ॥५९॥
कर्णिका बीजकोशः स्यात्किंजल्कं केसरं स्मृतं ।
मृणालं स्याद्बिसं कंदो विसिनी नलिनी भवेत् ॥६०॥
कुमुद्वती कुमुदिनी बुधैः कैरविणी स्मृता ।
शेवालं शैवलं प्रोक्तं जलशूकं च नीलिका ॥६१॥
अंधुः कूपः प्रधिर्नेमिश्चुरी चुंठी च चूतकः ।
निपानमुदपानं च वाप्याह्वावश्च कथ्यते ॥६२॥
उद्घाटकं घटीयंत्रं पादावर्तो ऽरघट्टकः ।
पानं तु सारणिः प्रोक्ता प्रणाली जलपद्धतिः ॥६३॥

॥ इति श्रीभट्टहलायुधकृतायामभिधानरत्नमालायां
पातालकांडं तृतीयं समाप्तं ॥

निकरनिकायनिवहविसरव्रजपुंजसमूहसंचयाः
समुदयसार्थयूथनिकुरंबकदंबकपूगराशयः ।
चयसमवायवृंदसंदोहसमाजवितानसंहति-
प्रकरघनौघसंघसंघातव्रातकुलोत्कराः स्मृताः ॥१॥
पटलं पेटकं चक्रं चक्रवालं च मंडलं ।

जालं जातं तथा व्यूहवारस्तोमाश्च ते स्मृताः ॥२॥

सूक्ष्मलेशलवश्लक्ष्णाल्पक्षुद्रदभ्रकणाणवः।

किंचिन्मात्रतनुस्तोकह्रस्वाल्पत्रुटयः समाः ॥३॥

प्राग्र्यं प्राग्रहरं प्रवेकमपरं वर्यं वरेण्यं वरं

श्रेष्ठं प्रेष्ठमनुत्तमं च मधुरं मंजु प्रियं मंजुलं।

हृद्यं हारि मनोहरं च रुचिरं कांतं परं सुंदरं

सौम्यं साधु च वल्गु चारु सुषमं वामं शुभं पेशलं ॥४॥

अग्र्यं प्रधानं प्रमुखं पुरोगं मुख्यं परार्ध्यं प्रवरं प्रबर्हं।

अग्रेसरं सत्तममुत्तमं च ग्रामण्यमग्रण्यमुदाहरंति ॥५॥

शंका वितर्कः संदेहः संशयारेकविभ्रमाः।

विचिकित्सा विकल्पश्च भ्रांतिरेकार्थवाचकाः ॥६॥

समीपं सनीडं समर्यादमारा-

त्सदेशं सवेशं ससीमोपकंठं।

तथाभ्यर्णमभ्यग्रमभ्याशमाहु-

र्बुधाः संनिधानांतिके संनिकृष्टं ॥७॥

आसन्नं सविधं पार्श्वमुपांतमपदांतरं।

विप्रकृष्टं परं दूरमाराच्चवहितं स्मृतं ॥८॥

सदृक् समानः सदृशः सदृक्षः प्रख्यः प्रकाशः प्रतिमः प्रकारः।

तुल्यः समः संनिभ इत्यभिन्नाः शब्दाः प्रयोगेषु गवेषणीयाः ॥९॥

लोलं चपलं चटुलं प्रचलं तरलं परिप्लवमधीरं।

पारिप्लवं च धीराश्चलाचलं चंचलं च कथयंति ॥२०॥
वक्रं वृजिनं भंगुरमाविद्धं वेल्लितं नतं जिह्मं।
भुग्नमरालं कुटिलं व्याकुंचितमूर्मिमत्काथितं ॥२१॥
द्राक् चपलं लघु मंक्षु स्राक् तूर्णं त्वरितमाशु शीघ्रमरं।
अह्नाथ सत्वरं च क्षिप्रं द्रुतमंजसा झटिति ॥२२॥
सततं संततमनिशं नित्यमजस्रं च शश्वदश्रांतं।
अविरतमनवरतं स्यादेकार्थमनारतमसक्तं ॥२३॥
वृहद्बरु गुरु विस्तीर्णं पुरु पृथु पृथुलं महद्विशालं च।
व्यूढं विपुलं रुन्द्रं वरिष्ठमेकार्थमुद्दिष्टं ॥२४॥
युग्मं युगं च युगलं द्वंद्वं द्वितयं यमं यमलं।
स्त्रीपुंसयोस्तु युग्मं मिथुनं परिकथ्यते सद्भिः ॥२५॥
प्राज्यं भूरि प्रभूतं च प्रचुरं बहुलं बहु।
पुरुहं पुष्कलं पुष्टमदभ्रमभिधीयते ॥२६॥
आचितं निचितं व्याप्तं छन्नं कीर्णं च संकुलं।
आकुलं भरितं पूर्णं नातिनानार्थवाचकाः ॥२७॥
प्रत्याख्यातं प्रतिक्षिप्तं प्रत्यादिष्टं निराकृतं।
निरस्तमपविद्धं च प्राज्ञाः परिहृतं विदुः ॥२८॥
अत्याकारः परिभवो निकारश्च पराभवः।
अनादरश्चाभिभवस्तिरस्कारश्च कथ्यते ॥२९॥
घोरं प्रतिभयं भीमं दारुणं स्याद्भयानकं।

आभीलं भीषणं भीष्मं भैरवं च भयावहं ॥२०॥
सख्यं साप्तपदीनं सौहार्दं सौहृदं तथा स्नेहः।
मैत्री प्रीतिरजर्यं सभाजनं संगतं प्रोक्तं ॥२१॥
आदिरग्रं पुरा पूर्वं प्रथमं प्राक् पुरः स्मृतं।
उपज्ञोपक्रमारंभौ पश्चाच्च चरमं भवेत् ॥२२॥
रहः प्रच्छन्नमेकांतं निःशलाकमुपह्वरं।
उपांशु विजनं प्रोक्तं रहस्यं गुह्यमुच्यते ॥२३॥
कैतवं कपटं कूटं व्याजच्छद्मोपधिच्छलं।
मिषं निभं च निर्दिष्टं व्यपदेशश्च सूरिभिः ॥२४॥
इच्छा वांछा स्पृहा कांक्षा कामनेप्सा रुचिस्तथा।
आशंसा चेति तुल्यार्था निश्चितं नियतं स्मृतं ॥२५॥
जीर्णं जरत्पुराणं प्रत्नं प्रतनं पुरातनं प्रोक्तं।
नव्यं नवं नवीनं स्यान्नूतनमभिनवं नूत्नं ॥२६॥
निवृतं वेष्टितमुक्तं परिवृत्तं वलयितं परिक्षिप्तं।
आवर्हितमुन्मूलितमुत्पाटितमुद्धृतं च समं ॥२७॥
कृत्स्नं समग्रं सकलं समस्तं सर्वं च विश्वं निखिलाखिले च।
खंडार्धनेमाः शकलं च भित्तं सामीत्यसंपूर्णसमानसंज्ञाः ॥२८॥
अवकीर्णमवधस्तं त्यक्तमुत्सृष्टमुज्झितं।
अनादृतमवज्ञातमपहस्तितमिष्यते ॥२९॥
आगूः संगरसंधाप्रतिश्रवाः संश्रवः प्रतिज्ञा च।

हेला स्यादवहेलं रीढावज्ञावलीढा च ॥३०॥
मूलीकर्म प्रोक्तं संवननं कार्मणं वशीकरणं ।
विप्रतिसारो ऽनुशयः पश्चात्तापो ऽनुतापः स्यात् ॥३१॥
क्षामं शातं कृशं क्षीणं पेलवं तलिनं तनु ।
निरंतरं घनं सांद्रं बहुलं विरलेतरं ॥३२॥
निबिडं निबिरीशं च दृढं गाढं प्रचक्षते ।
कामं प्रकामं पर्याप्तं नितांतं भृशमुच्यते ॥३३॥
अत्यर्थमतिमर्यादमतिवेलं च कथ्यते ।
व्यवधानं तिरोधानमंतार्धिरपवारणं ॥३४॥
परस्परं मिथः प्रोक्तमन्योन्यमितरेतरं ।
कौतूहलं विनोदः स्यात्कौतुकं च कुतूहलं ॥३५॥
आली श्रेण्यावली पंक्तिर्वीथी राजी च कथ्यते ।
क्षौरं च भद्राकरणं मुंडनं वपनं स्मृतं ॥३६॥
दर्पो मदो ऽवलेपो मानो गर्वो भवेदहंकारः ।
आवेशः संवेगः संरंभः संभ्रमस्तथाटोपः ॥३७॥
प्राणः स्थाम बलं द्युम्नमोजः शुष्म तरः सहः ।
प्रतापः पौरुषं तेजो विक्रमः स्यात्पराक्रमः ॥३८॥
अनुक्रोशः कृपा शूकं दया च करुणा घृणा ।
प्रतिक्षणमभीक्ष्णं च भूयः स्यादसकृन्मुहुः ॥३९॥
आतंको भयमाशंका दरस्त्रासश्च साध्वसं ।

आभीलं भीषणं भीष्मं भैरवं च भयावहं ॥२०॥
सख्यं साप्तपदीनं सौहार्दं सौहृदं तथा स्नेहः।
मैत्री प्रीतिरजर्यं सभाजनं संगतं प्रोक्तं ॥२१॥
आदिरग्रं पुरा पूर्वं प्रथमं प्राक् पुरः स्मृतं।
उपज्ञोपक्रमारंभौ पश्चाच्च चरमं भवेत् ॥२२॥
रहः प्रच्छन्नमेकांतं निःशलाकमुपह्वरं।
उपांशु विजनं प्रोक्तं रहस्यं गुह्यमुच्यते ॥२३॥
कैतवं कपटं कूटं व्याजच्छद्मोपधिच्छलं।
मिषं निभं च निर्दिष्टं व्यपदेशश्च सूरिभिः ॥२४॥
इच्छा वांछा स्पृहा कांक्षा कामनेप्सा रुचिस्तथा।
आशंसा चेति तुल्यार्था निश्चितं नियतं स्मृतं ॥२५॥
जीर्णं जरत्पुराणं प्रत्नं प्रतनं पुरातनं प्रोक्तं।
नव्यं नवं नवीनं स्यान्नूतनमभिनवं नूत्नं ॥२६॥
निवृतं वेष्टितमुक्तं परिवृत्तं वलयितं परिक्षिप्तं।
आवर्हितमुन्मूलितमुत्पाटितमुद्धृतं च समं ॥२७॥
कृत्स्नं समग्रं सकलं समस्तं सर्वं च विश्वं निखिलाखिले च।
खंडार्धनेमाः शकलं च भित्तं सामीत्यसंपूर्णसमानसंज्ञाः ॥२८॥
अवकीर्णमवध्वस्तं त्यक्तमुत्सृष्टमुज्झितं।
अनादृतमवज्ञातमपहस्तितमिष्यते ॥२९॥
आगूः संगरसंधाप्रतिश्रवाः संश्रवः प्रतिज्ञा च।

हेला स्यादवहेलं रीढावज्ञावलीढा च ॥३०॥
मूलीकर्म प्रोक्तं संवननं कार्मणं वशीकरणं।
विप्रतिसारो ऽनुशयः पश्चात्तापो ऽनुतापः स्यात् ॥३१॥
क्षामं शातं कृशं क्षीणं पेलवं तलिनं तनु।
निरंतरं घनं सांद्रं बहुलं विरलेतरं ॥३२॥
निबिडं निविरीशं च दृढं गाढं प्रचक्षते।
कामं प्रकामं पर्याप्तं नितांतं भृशमुच्यते ॥३३॥
अत्यर्थमतिमर्यादमतिवेलं च कथ्यते।
व्यवधानं तिरोधानमंतर्धिरपवारणं ॥३४॥
परस्परं मिथः प्रोक्तमन्योन्यमितरेतरं।
कौतूहलं विनोदः स्यात्कौतुकं च कुतूहलं ॥३५॥
आली श्रेण्यावली पंक्तिर्वीथी राजी च कथ्यते।
क्षौरं च भद्राकरणं मुंडनं वपनं स्मृतं ॥३६॥
दर्पो मदो ऽवलेपो मानो गर्वो भवेदहंकारः।
आवेशः संवेगः संरंभः संभ्रमस्तथाटोपः ॥३७॥
प्राणः स्थाम बलं द्युम्नमोजः शुष्म तरः सहः।
प्रतापः पौरुषं तेजो विक्रमः स्यात्पराक्रमः ॥३८॥
अनुक्रोशः कृपा शूकं दया च करुणा घृणा।
प्रतिक्षणमभीक्ष्णं च भूयः स्यादसकृन्मुहुः ॥३९॥
आतंको भयमाशंका दरस्त्रासश्च साध्वसं।

मर्षः क्षमा तितिक्षा च क्षांतिरुक्ता सहिष्णुता ॥४०॥
वैणवो लगुडो रंभो दंडो यष्टिश्च कथ्यते।
गतिर्वीखा विहारः स्यात्परिसर्पः परिक्रमः ॥४१॥
अणिरश्रिस्तथा कोटिरश्रः कोणश्च कथ्यते।
कश्मलं मलिनं म्लानं मलीमसमुदाहृतं ॥४२॥
भृतिर्भृत्या च कर्मण्या वेता मूल्यं च वेतनं।
लिपिरालेख्यलेखा स्याल्लिपिर्लेखाक्षरस्य च ॥४३॥
कल्पनं कर्तनं प्रोक्तं वर्धनं छेदनं तथा।
व्यत्ययः स्याद्विपर्यासो वैपरीत्यं विपर्ययः ॥४४॥
अपह्नवो ऽपलापः स्यादपज्ञानमपात्ययः।
ग्रंथनं ग्रंथनं गुंफः संदर्भो रचना स्मृता ॥४५॥
उद्वर्तनमुत्सादनमाकुः सोत्प्रासहसितमुपहसितं।
उत्पिंजलमाकुलकं स्यादनुपदमन्वगन्वक्षं ॥४६॥
गौरः श्वेतः सितः शुभ्रो वलक्षो धवलो ऽर्जुनः।
हरिणः पांडुरः पांडुरवदातश्च पांडरः ॥४७॥
अरुणः शोणो रक्तो मांजिष्ठः पाटलस्तथा ताम्रः।
लोहित इत्येकार्थाः कविभिः शब्दाः प्रयुज्यंते ॥४८॥
असितं शिति कृष्णं च कालं नीलं च मेचकं।
श्यामं तु श्यामलं रामं पालाशं हरितं हरित् ॥४९॥
हरिः कद्रुः कडारश्च पिंगलः परिकीर्तितः।

पीतं हारिद्रमाख्यातं श्यावं तु कपिशं स्मृतं ॥५०॥
पिंगः पिशंग इत्युक्तो बभ्रुः कपिलः पिंगलः।
सारंगः शबलो वर्णः कल्माषः कृष्णपांडुरः ॥५१॥
पिंजरः पीतरक्तः स्याद्धूसरः स्तोकपांडुरः।
रक्तश्यामो भवेद्धूम्रो धूमलः स च कथ्यते ॥५२॥
श्येनी कुमुदपत्राभा शुकाभा हरिणी स्मृता।
जपाकुसुमसंकाशा लोहिनी परिकीर्तिता ॥५३॥
परिपाट्यानुपूर्वी स्यादुपशायो ऽनुपात्ययः।
अनुक्रमश्च पर्यायो विशायः परिकीर्तितः ॥५४॥
ईर्ष्या स्यात्कुहना दंभो मिथ्याचर्या च कुक्कुटिः। पाणिनीये तु कुक्कुटीशब्द आश्रितः।
कुसृतिर्निकृतिर्माया शांबरी पथकल्पना ॥५५॥
चित्रकिर्मीरकल्माषशबलोन्मिश्रकर्बुराः।
करंबः कवरः शारः संपृक्तः खचितः समाः ॥५६॥
आयल्लकमुत्कंठा स्यादुत्कलिकारतिश्च रणरणकं।
औत्सुक्यं हल्लेखो विरहवियोगौ च तुल्यार्थौ ॥५७॥
प्रतिकूलं प्रतिलोमं प्रतीपमुक्तं प्रसव्यमेकार्थं।
अपवारितं च पिहितं संवीतं संवृतं स्थगितं ॥५८॥
आकुः प्रतीकमवयवमपघनमंगं तथैकदेशं च।
उल्वणमुद्धतमुद्भटमुत्कटमिति नातिनानार्थाः ॥५९॥
समाजः संसदास्थानी सभा स्यात्परिषत्सदः।

चित्रमद्भुतमाश्चर्यं विस्मयश्चोद्यमुच्यते ॥६०॥
प्रेंखोलितं तरलितं प्रेंखितं लुलितं स्मृतं।
युक्तं स्यादुचितं न्याय्यं प्राप्तमौपयिकं तथा ॥६१॥
आहितं निहितं न्यस्तमारोपितमिति स्मृतं।
बद्धं पिनद्धमामुक्तमपिनद्धं च कथ्यते ॥६२॥
वंचनं चातिसंधानं व्यलीकं स्यात्प्रतारणं।
विप्रलंभो विसंवादो विप्रलापश्च कीर्तितः ॥६३॥
व्यलीकमपराधः स्यादागो मंतुश्च विप्रियं।
प्रणतिः स्यादनुनयः प्रणिपातश्च सांत्वनं ॥६४॥
उद्घात उक्तः प्रस्तावो वारश्चावसरः क्षणः।
वदंत्युपनतं प्राप्ता उपसन्नमुपस्थितं ॥६५॥
प्रांशूच्चमुन्नतं तुंगमुदग्रं दीर्घमायतं।
अयंत्रितं स्यादुद्दाममुच्छृंखलमनर्गलं ॥६६॥
विशदं प्रकटं स्पष्टं प्रकाशं स्फुटमिष्यते।
तत्क्षणैकपदे तुल्ये सद्यः सपदि च स्मृते ॥६७॥
विशंकटं विशालं स्यात्करालं विकटं तथा।
निस्तलं वर्तुलं वृत्तं स्थपुटं विषमोन्नतं ॥६८॥
अवगाहो जलद्रोणी निर्वेदः खेद उच्यते।
प्रमादो ऽनवधानं स्यादत्याधानमतिक्रमः ॥६९॥
निर्वेश उपभोगः स्यादाभोगः परिपूर्णता।

अवगीतं मुहुर्दृष्टमुपलब्धं च यद्भवेत् ॥७०॥
वामं सव्यं विदुः प्राज्ञा अपसव्यं च दक्षिणं।
प्रतिकूलानुकूलार्थे अपष्ठु त्वनपष्ठु च ॥७१॥
विपरीतं पराचीनमपाचीनं पराङ्मुखं।
स्मृतं कौसीद्यमालस्यमुपधा तु परीक्षणं ॥७२॥
विवधो वीवधो भारः पर्याहारश्च कथ्यते।
काचं शिक्यमिति प्रोक्तं भारयष्टिर्विहंगिका ॥७३॥
सौष्ठवं स्यादवष्टंभो हठः प्रसभमुच्यते।
प्रग्रहो ग्रहको वंदी पणो ऽक्षेषु ग्लहः स्मृतः ॥७४॥
प्रायः स्याद्भोजनत्यागः संन्यासो ऽनशनं स्मृतं।
मोघं मुधाफलं बंध्यं नतं नम्रं च बंधुरं ॥७५॥
स्मृतं वणिज्यं वाणिज्यं वणिज्या च समं त्रयं।
युद्धार्थे द्वे प्रयुज्येते दौर्मद्यं च करीरकं ॥७६॥
आकूतं स्यादभिप्रायो व्याकूतिर्भंगिरुच्यते।
स्थंडिलं संस्कृता भूमिरयनं स्थानमुच्यते ॥७७॥
प्रत्यग्रमुक्तं सद्यस्कमुपाग्रमुपसर्जनं।
दोला प्रेंखोलनं प्रेंखा उत्सवः स्यान्महः क्षणः ॥७८॥
गवलं माहिषं शृंगं दृतिश्चर्मप्रसेवकः।
समुद्गः संपुटो ज्ञेयो वडिशं मत्स्यबंधनं ॥७९॥
कृते प्रतिकृतं प्राज्ञैः प्रतिनिर्यातनं स्मृतं।

लिमर्दौल्ये परिमल इत्यमरे पाठः।

सपत्नाकरणं प्रोक्तं यत्परस्यातिपीडनं ॥ ८०॥
समासः स्यात्समाहारः संक्षेपः संग्रहस्तथा।
व्यासः प्रपंचो विस्तारः स च शब्दस्य विस्तरः ॥ ८१॥
ऊनं क्लिन्नं स्मृतं नुन्नं क्षिप्तं तुन्नं च पीडितं।
पन्नं तु पतितं प्रोक्तं सन्नं शांतं च सूरिभिः ॥ ८२॥
न्यंचितं स्यादधः क्षिप्तं क्षिप्तमूर्ध्वमुदंचितं।
काचितं सज्जितं प्रोक्तं द्रावितं गुंडितं स्मृतं ॥ ८३॥
विष्कंभः प्रतिबंधो विश्रंभः कथ्यते च विश्वासः।
संमर्दः स्यात्परिमल उपमर्दो विप्रकारः स्यात् ॥ ८४॥
उपाधिर्धर्मचिंता स्यान्निःशोध्यमनवस्करः।
कुप्रियं तु जघन्यं स्यान्निःशेषं न्यक्षमिष्यते ॥ ८५॥
अपकारो भवेद्द्रोहो दोष आदीनवो मतः।
कषायं तुवरं प्रोक्तं सुरुंगा संधिरुच्यते ॥ ८६॥
असौम्यं यद्भवेच्चक्षुरचक्षुस्तत्प्रचक्षते।
अवहित्थं च शब्दज्ञा आकारस्य निगूहनं। ८७॥
संस्तवः स्यात्परिचयः प्रसादः प्रणयः स्मृतः।
प्रवारणं महादानं संकल्पः कर्ममानसं ॥ ८८॥
अनायासार्थकं फांटमंतर्गडु निरर्थकं।
स्वाच्छंद्यं निर्निमित्तं च यदृच्छेत्यभिधीयते ॥ ८९॥
आद्यमादिममंत्यं स्यादंतिमं चाग्र्यमाग्रिमं।

मध्यमं मध्यमीयं च मध्यंदिनमुदाहृतं ॥ ९० ॥
नमस्या वंदना प्रोक्ता तपस्या नियमस्थितिः ।
परिव्रज्या व्रतादानं व्रज्याख्या च गतिः स्मृता ॥ ९१ ॥
रिक्तं तुच्छमसारं तु फल्गु व्युष्टिः फलं स्मृतं ।
कलिलं गहनं प्रोक्तं श्लथं शिथिलमुच्यते ॥ ९२ ॥
स्वतंत्रवृत्तिर्व्युत्थानमभ्युत्थानं च गौरवं ।
संस्थानं संनिवेशः स्यादास्थानं नृपतेः सभा ॥ ९३ ॥
संकथान्योन्यसंगीतिः प्रतिपत्तिः प्रगल्भता ।
उच्यत ऊर्ज उत्साहो भृकुटिर्भ्रुकुटिस्तथा ॥ ९४ ॥
उपजापो भवेद्भेदः साम सांत्वमिति स्मृतं ।
तथेति प्रत्ययः श्रद्धा संस्कारो वासना स्मृता ॥ ९५ ॥
स्मृतमास्थितमाक्रांतं प्रतीष्टं पतदाहृतं ।
प्रच्छादितं स्यात्संवीतं प्रशस्तं संस्कृतं स्मृतं ॥ ९६ ॥
उन्माथः कूटयंत्रं स्यादवपातो ऽवटः स्मृतः ।
धर्मः स्वभाव आत्मा स्यादवेक्षा प्रतिजागरः ॥ ९७ ॥
स्मृतं परुषमस्निग्धमाचारातिक्रमः क्रिया ।
उच्चंडमप्रलंबं स्यान्माढिः पत्रशिरा स्मृता ॥ ९८ ॥
अहमहमिका तु सा स्याद्यत्क्रियते स्पर्धयाधिकं किंचित् ।
यत्र वृथाभिनिवेशस्तामाहोपुरुषिकां विदुः प्राज्ञाः ॥ ९९ ॥
सिंहनादो भवेत् क्ष्वेडा गंडूषो मुखपूरणं ।

प्रभावतां वदंत्यार्याः प्रभुतां प्रभविष्णुतां ॥१००॥
परभागो गुणोत्कर्षः स्पर्धा संहर्ष उच्यते ।
आयामः स्मृत आनाहः परिणाहो विशालता ॥१०१॥
॥ इति श्रीभट्टहलायुधकृतायामभिधानरत्नमालायां
सामान्यकांडं चतुर्थं समाप्तं ॥

एको ऽर्थो बहुभिः शब्दैः कथितः कथ्यते ऽधुना ।
एकस्यैव तु शब्दस्य बहुष्वर्थेषु वर्तनं ॥१॥
रुद्रे ऽपि खंडपरशुर्वैश्रवणे ऽप्येककुंडलः प्रोक्तः ।
द्वारे ऽपि प्रतिहारः प्राकाराग्रे ऽपि कपिशीर्षं ॥२॥
पर्याप्ते ऽपि कृतं स्यादाहवनीयादिषु त्रिषु त्रेता ।
संदेहे ऽपि द्वापरमाहुः कलहे ऽपि कलिशब्दं ॥३॥
सेनायामपि कटकं प्राणिद्यूतं वदंति युद्धे ऽपि ।
रत्नस्यापि पुण्यजनं मृद्भांडे ऽप्युष्ट्रिकामार्याः ॥४॥
श्वेतं रजते ऽप्युक्तं रजतं हारे शरे ऽपि किंशारुः ।
दंभे ऽपि गह्वरं स्यादुपह्वरं संनिधाने ऽपि ॥५॥
नयनच्छदे ऽपि वर्त्म प्रतिग्रहः सैन्यपृष्ठभागे ऽपि ।
श्लेष्मण्यपि खेटः स्याज्जामिः कुलबालिकायां च ॥६॥
गंधो लेशे ऽप्युक्तः करुणाप्रतिपादने तपस्वी च ।

मणिबंधकनिष्ठकयोर्मध्यविभागे ऽपि करभः स्यात् ॥७॥
चिंतायामपि चर्चा जगती राजप्रधानलोके ऽपि।
ऋतुरंगनारजस्यपि विकटं श्रेष्ठे ऽपि निर्दिष्टं ॥८॥
कवचे ऽपि वारवाणं जीमूतं पर्वते ऽपि कथयंति।
व्यूढं रचनायामपि दार्वाघाटे ऽपि शतपत्त्रं ॥९॥
करणं काये ऽपि स्यादुष्णीषो मूर्धवेष्टने ऽप्युक्तः।
मात्रा परिच्छदे ऽपि क्षुद्रः क्रूरे श्रुतौ निगमः ॥१०॥
वृजिनः केशे ऽप्युक्तः स्थाणुः कीले ऽपि कुंजरे नागः।
गंजो भांडागारे गोमुखमुपलेपने ऽपि स्यात् ॥११॥
तेजस्यपि धाम स्यादाधारे ऽप्याशयो घटा गोष्ठ्यां।
कुल्या कुलस्त्रियामपि तारो मुक्तागुणे ऽप्युक्तः ॥१२॥
कर्मविपाके ऽपि दशागती स्मृते कानने ऽपि दवदावौ।
चूडाशिखे शिरस्यपि हस्तिन्यां धेनुकागणिके ॥१३॥
प्रतिपत्प्रतिपत्तावपि शादः शष्पे घृणा जुगुप्सायां।
उत्तालमुन्नते ऽपि श्रेष्ठे ऽपि निगद्यते सुरभिः ॥१४॥
संवर्तः परिवर्तश्च हायने कथ्यते ऽंबरे नाकः।
परिमाणे ऽपि प्रस्थः सर्वात्मनि सर्वसंनाहः ॥१५॥
पत्न्यामपि द्वितीया दर्भे ऽपि पवित्रमवधिरवटे ऽपि।
प्रकृतावपि प्रधानं विवक्षितं शोभने ऽपि स्यात् ॥१६॥
अतिमात्रे ऽप्यतिवेलं काये ऽप्युत्सेध इष्यते सद्भिः।

पृष्ठास्थन्यपि वंशः कदली करिवैजयंत्यां च ॥१७॥
जालं कपटे ऽप्युक्तं कपालमुक्तं घटादिशकले ऽपि ।
रिष्टं पापाशुभयोररिष्टमशुभे ऽपि निर्दिष्टं ॥१८॥
व्यासे ऽपि विग्रहः स्यान्मानविशेषे ऽपि पौरुषव्यामौ ।
हेला प्रस्तावे ऽपि प्रग्रह आबंधने ऽप्युक्तः ॥१९॥
कुंजरकरे ऽपि शुंडा ग्रावा शैले भवश्च संसारे ।
बाले ऽपि बालिशः स्यात्कलधौतं शातकुंभे ऽपि ॥२०॥
शाखायामपि परिधिर्वसतिर्जैनाश्रमे ऽपि निर्दिष्टा ।
अन्वेषणे ऽपि मार्गो भद्रो वृषभे वके ध्वांक्षः ॥२१॥
मणिदोषे ऽपि त्रासो वत्सः संवत्सरे ऽपि निर्दिष्टः ।
वामः प्रतिकूले ऽपि प्रोक्तौ शुक्ले ऽपि शुचिरामौ ॥२२॥
श्वस्तनदिने ऽपि कल्यं नेत्रं मूले रजस्यपि परागः ।
भ्रूणो गर्भिण्यामपि भूतिर्विभवे बलः काके ॥२३॥
गिरिसानुन्यपि वप्रं तल्पं दारेषु चक्षुषि ज्योतिः ।
चौर्यादावपि हिंसा प्रसरः प्रणये ऽपि निर्दिष्टः ॥२४॥
संघाते ऽपि ग्रामो भूतेंद्रियशब्दविषयकरणानां ।
षंडश्च पादपानां स्कंधः करिनरतुरंगानां ॥२५॥
नंद्यावर्तः सरलः शालः काको धवो ऽञ्जनस्तिलकः ।
पद्मस्यंदनमोचा वृक्षविशेषे ऽपि दृश्यंते ॥२६॥
कटुतिक्तकषायास्तु सौरभ्ये ऽपि प्रकीर्तिताः ।

शोभार्थे ऽपि प्रयुज्यंते लक्ष्मीश्रीकांतिविभ्रमाः ॥२७॥
आर्यः स्यात्सौविदल्ले ऽपि व्रीडावप्यणुरिष्यते ।
चंडाले ऽपि दिवाकीर्तिर्विवस्वान्देवतास्वपि ॥२८॥
स्नेहे ऽप्यपह्नवः प्रोक्तो द्वेषे ऽप्यनुशयः स्मृतः ।
सुरते ऽपि व्यवायः स्यान्निगमश्च क्रतावपि ॥२९॥
दुर्गमार्गे ऽपि कांतारं गृहवाट्यां च निष्कुटः ।
रूपं मृगे ऽपि विज्ञेयं बभ्रुः स्यान्नकुले ऽपि च ॥३०॥
अंतर्गृहे ऽपि कोष्ठः स्याच्चत्वरं प्रांगणे ऽपि च ।
दुश्चर्मण्यपि निर्दिष्टः शिपिविष्टो मनीषिभिः ॥३१॥
संस्तरः प्रस्तरे ऽप्युक्तो हनौ कुंजो रणे स्वशः ।
गर्जन्मेघे ऽपि पर्जन्यः संधा स्यादवधावपि ॥३२॥
व्यवस्थायां च संस्था स्यात्संवित्तावपि वेदना ।
यात्रा स्यादनुवृत्तौ च संज्ञायां च समाह्वयः ॥३३॥
क्लीबो विक्रमहीने ऽपि समये ऽपि कटः स्मृतः ।
कलंकं लांछने दोषे ऽप्यद्रिः प्रोक्तो रवावपि ॥३४॥
समितिः संगतिसभयोः ककुदं शृंगे विट्टः प्रधाने ऽपि ।
टंकः स्यादभिमाने प्रस्तरघटनोपकरणे च ॥३५॥
संकेते चैतन्ये च सूरिभिः कथ्यते तथा संज्ञा ।
दंडी दमने सैन्ये कुतपो दर्भे ऽपराह्णे च ॥३६॥
कारुण्ये ऽप्यनुषंगः स्यात्प्रोक्तो गुह्ये ऽप्यवस्करः ।

वेदिकांगुलिमुद्रायां लाक्षायां च कृमिस्तथा ॥३७॥
नीवी परिपणे ऽप्युक्ता कटिदेशे ऽपि मेखला।
प्रत्यवाये ऽपि विश्लेषे विधुरं स्मर्यते बुधैः ॥३८॥
निदानमवसाने ऽपि स्वामिन्यपि भवेदिनः।
जठरः कठिने ऽप्युक्तः प्राज्ञैः परिणते ऽपि च ॥३९॥
काले कल्पे ऽपि विधिर्घननघनः शक्रवर्षुकांबुदयोः।
अत्ययशब्दः प्राज्ञैः कृच्छ्रे चातिक्रमे च निर्दिष्टः ॥४०॥
उदरे जले कृपीटं संबाधः संकटे भगे ऽप्युक्तः।
पार्ष्णिः प्रत्यासारे च रणस्य च पश्चिमे भागे ॥४१॥
रतिभुक्त्योः संभोगः पथिदेये स्त्रीधने च शुल्कं स्यात्।
वंशांकुरे करीरं वृक्षविशेषे ऽपि कथयंति ॥४२॥
अनूकमन्वये शीले गोत्रं नाम्नि तथान्वये।
पुलाकं भक्तसिक्थे च क्षुद्रधान्ये च कथ्यते ॥४३॥
अकार्ये गुह्ये कौपीनं कीलालं रुधिरे जले।
कुकूलं शंकुमद्गर्ते तुषाग्नौ च निगद्यते ॥४४॥
चैत्यं बुद्धांडके ऽप्युक्तं देवतायतने तथा।
कतके वृक्षजातौ च शिलींध्रं स्मर्यते बुधैः ॥४५॥
अर्थव्ययसहे व्यालस्तथा हिंस्रपशौ स्मृतः।
पोत्रमित्युच्यते प्राज्ञैर्हलशूकरयोर्मुखं ॥४६॥
मंदस्वच्छंदयोः स्वैरं कक्षः स्यात्कच्छवीरुधोः।

करेणुर्गजहस्तिन्योः पीलुश्च गजवृक्षयोः ॥४७॥
शलाकायुधयोः शल्यं बाधा दुःखनिषेधयोः।
स्थूणास्तबधवयोः स्तंभ इला वाग्गव्ययोरपि ॥४८॥
अर्चनामूल्ययोरर्घो विसर्गो मुक्तिवर्चसोः।
मुनिकुक्कुटयोर्दक्षः संधिः संश्लेषरंध्रयोः ॥४९॥ सन्धिं छित्वाभि चौर इव गन्धी रन्ध्रम्।
अवश्यभृशयोर्वाढं दायादस्तुकसपिंडयोः।
कुलीनश्रेष्ठयोर्जात्यं कोटिरुत्कर्षसंख्ययोः ॥५०॥
ब्रध्नस्तंडुगिरिशयोः स्थितिः स्थानव्यवस्थयोः।
वीकाशः स्फुटरहसोः काष्ठा कालप्रकर्षयोः ॥५१॥
नदीसमुद्रयोः सिंधुर्देशपर्वतयोर्मरुः।
मैथुनं कथ्यते सद्भिः संबंधग्राम्यधर्मयोः ॥५२॥
प्रग्रहबंधनयोः प्राधं मोहः स्यान्मौढ्यमूर्छयोः।
व्यवस्थाने ऽंभसो वेला रविः पर्वतसूर्ययोः ॥५३॥
अभ्युत्पातौ धूमकेतू श्वशुर्यौ श्यालदेवरौ।
दिव्यार्थसंग्रहौ कोशौ नरेंद्रौ नृपवार्त्तिकौ ॥५४॥
आडंबरो गजानां पटहरवे गर्जिते प्रपंचे च।
ग्रहशब्दः सूर्यादिषु भूतादिष्वभिनिवेशे च ॥५५॥
अव्यक्तः परमात्मनि मूर्खे स्पष्टेतरे च निर्दिष्टः।
कक्षा गुह्यपिधाने कांच्यां गेहे प्रकोष्ठे च ॥५६॥
प्रतियत्नः संस्कारे लिप्सोपग्रहणयोश्च निर्दिष्टः।

अभिहार: संनाहे स्यादभियोगे परस्वहरणे च ॥५७॥
दानविशेषे लब्धौ दायो भागार्हपित्र्यरिक्थे च।
लिपिसंख्यायां शास्त्रे द्रव्ये च ग्रंथशब्दमिच्छंति ॥५८॥
द्यूताक्षसारिफलकास्त्रयो ऽप्याकर्षसंज्ञका:।
संसर्गाभिभवाक्रोशेष्वभिषंग: प्रकीर्तित: ॥५९॥
त्वाष्ट्रे तमसि शत्रौ च वृत्रशब्दस्त्रिषु स्मृत:।
मन्युर्दैन्ये क्रतौ कोपे नाडीस्वर्गक्षितिष्विडा ॥६०॥
उक्तानामप्यनुक्तानां शब्दानामिह संग्रह:।
कशब्द: सुखवाय्वंबुब्रह्ममस्तकवाचक: ॥६१॥
प्रत्यय: शपथज्ञानहेतुविश्वासनिश्चया:।
विस्तारे कदके शून्ये वितानं स्यात्क्रतौ क्षणे ॥६२॥
देहावयवमासार्धपतत्रगृहभित्तिषु।
परिग्रहे समीपे च पक्ष: षट्सु निगद्यते ॥६३॥
अग्निधनरश्मिरत्नत्रिदशविशेषेषु भवति वसुशब्द:।
चेष्टात्मजन्मसत्ताभिप्रायेष्वभिहितो भाव: ॥६४॥
कालविशेषे ऽवसरे ऽव्यापारे पारतंत्र्ये च।
मध्ये तथोत्सवे च क्षणशब्द: कथ्यते सद्भि: ॥६५॥
आचारे नयनादौ द्यूतविशेषे तथा रथावयवे।
अक्षं विभीतके ऽपि प्रयुंजते पंचसु प्राज्ञा: ॥६६॥
निष्ठा क्लेशे ऽवसाने च व्यवस्थोत्कर्षयोर्व्रते।

श्रेष्ठे स्थाम्नि धने शुक्रे मज्ज्ञि सार उदाहृतः ॥६७॥
दिग्दृष्टिदीधितिस्वर्गवज्रवाग्बाणवारिषु ।
भूमौ पशौ च गोशब्दो विद्वद्भिर्दशसु स्मृतः ॥६८॥
भूषायां लांगूले प्रधानशृंगप्रभावपुंड्रेषु ।
ध्वजलक्ष्मतुरंगेषु च नवसु ललामं प्रचक्षते प्राज्ञाः ॥६९॥
अर्कमर्कटमंडूकविष्णुवासववायवः ।
तुरंगसिंहशीतांशुयमाश्च हरयो दश ॥७०॥
पृथिव्यादिषु भूतेषु शरीरेषु रसादिषु ।
लोहेषु च स्मृतो धातुः स्वभावे गैरिकादिषु ॥७१॥
द्विरदकराग्रे पद्मे खड्गफले व्योम्नि वाद्यभांडमुखे ।
अगदे जले च तीर्थे पुष्करमष्टासु निर्दिष्टं ॥७२॥
चतुर्विधेषु जीवेषु पृथिव्यादिषु पंचसु ।
अतीते देवयोनौ च भूतशब्दं प्रचक्षते ॥७३॥
शुक्लादौ ब्राह्मणादौ च शोभायामक्षरे व्रते ।
गीतक्रमे स्तुतौ वेषे वर्णशब्दं प्रचक्षते ॥७४॥
